72. AV(P) and AVM$_2$: औचित्यात् for अचितत्वात्
73. AV(K), AVM$_1$ and AVM$_2$: कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः:, Changed the order according to AVT (B).
74. AVM$_1$ adds तथैव साकांक्षत्वात्। तथाच before the word. AVM$_2$ adds तथैव साकांक्षत्वात् before the word.
75. AVM$_1$: चैत्रः पचति तण्डुलं, चैत्रेण पच्यते तण्डुलः for चैत्रः ० तण्डुलः
76. AVM$_2$: प्रथमान्तोपस्थाप्यतया
77. AVM$_1$ omits the word.
78. AVM$_1$ and AVM$_1$ omit तथै · · · त्वात्०
79. AVM$_1$: मैत्रेण
80. AVM$_2$: भावनायां
81. AVM$_1$ omits the word.
82. AVM$_2$: साध्वर्थं
83. AVM$_1$ and AVM$_2$: द्विबहुत्वे०
84. AVM$_1$ and AV(P) : भावतिङामपि, AVM$_2$ omits: भावतिङां.

85. AVM_2 adds भावतिङा after the word.
86. AVM_1 adds तु before this word.
87. AVM_1 and AVM_2 : ०साधुतामात्रम्
88. AVM_2 : कर्तर्याश्रयत्वे
89. AVM_1 and AVM_2 : ०धायित्ववच्च
90. AVM_2 : पक्ष्यते मैत्रः
91. AVM_1 adds अपि after this word.
92. AV(K) and AVM_2 : व्यापारमात्रोपलक्षिता, AVM_1 : व्यापारोपलक्षिका
93. AVM_1 : रूपाभ्यामेकार्थबोधकत्वलक्षणं, AVM_2 : ०बोधकत्वं लक्षणं
94. AV(K), AVM_1 and AVM_2 : अप्रसिद्धं for असिद्धं
95. AVM_1 and AVM_2 add तु before न०
96. AVM_1 : चैत्रः
97. AVM_1 : चैत्रोऽस्तु, AVM_2 : मैत्रस्तु
98. AVM_1 and AVM_2 : चैत्रेण
99. AV(K) : सविषयकव्यापारा०
100. AVM_2 : विषय for विशेष्य
101. AVM_1 and AVM_2 omit the word.
102. AVM_2 : प्रतीत
103. AVM_1 omits the word.
104. AVM_1 : तृतीयार्थस्तु निष्ठत्वं, AVM_2 : तृतीयार्थः। ऽस्तु
105. AVM_1 : इच्छतीत्या०
106. AVM_2 : वाच्यार्थः
107. AVM_1 : जन्यं फलं
108. AVM_1 and AVM_2 : विपर्यास for विपर्यय
109. AVM_2 : ०पस्थाप्य
110. AVM_1 : लभ्यते
111. AVM_1 : भावनाविषयस्य च क्रियायाः
112. AV(K) and AVM_1 : ०भावनायां
113. AVM_1 : क्रियाया विशेषण.
114. AVM_1 and AVM_2 : क्लृप्तान्वयो for अन्वयो क्लृप्तः
115. AVM_1 : क्रियायां for विक्लित्यां, AVM_2 : कृत्यभिधायकभावकर्मकृद्योगे क्लृप्तशक्तिः सुपे लब्ध भावनायाः विशिष्टायाः क्रियायाः फलेऽन्वयः, सुबर्थकृतेश्च क्रियायां for कृत्य ० क्लित्यां
116. AVM_1 : व्युत्पन्नत्वाच्च, AVM_2 : अव्युत्पन्नत्वात्
117. AVM_1 : इत्यादयोऽपि
118. AV(K) and AVM_1 : तिङुपस्थापितायाः, AVM_2 : तिङोपस्था०
119. AVM_2 : भाव
120. AVM_1 omits एव
121. AVM_2 : व्युत्पन्नत्वात्
122. AVM_1 and AVM_2 : मैत्रो
123. AVM_2 : कुलं (?corrupt)
124. AVM_2 : ०सार्यत
125. AV(P): इत्यत्र
126. AVM_2 omits चैत्रस्य नप्ता
127. AVM_1 : चैत्रादन्यो, AVM_2 : मैत्रादन्यश्चैत्रस्य नप्ता
128. AVM_1 and AVM_2 : धात्वर्थान्वयः
129. AVM_2 omits the word.

130. AVM$_2$: सहान्वयः
131. AVM$_1$: तृतीयादयः
132. AVM$_1$ and AVM$_2$ omit एव.
133. AVM$_2$ adds कृतौ before the word.
134. AVM$_1$: ०वाचकत्वापत्तेः
135. AVM$_1$ omits the word.
136. AVM$_1$ and AVM$_2$ omit एव
137. AVM$_1$ and AVM$_2$: विनाऽवच्छेदकं रूपं
138. AVM$_1$ and AVM$_2$ add वा after this word.
139. AV(K): गोत्वविशिष्टं
140. AVM$_1$ omits the word. AVM$_1$: शक्यम्, तथात्वे विशिष्टा.
141. AVM$_2$: केवलविशेषण
142. AVM$_1$ and AVM$_1$ omit the word.
143. AVM$_2$: कृतात्मने.
144. AVM$_1$: ०विशेषमात्रोपस्थापकत्वस्थितौ
145. AVM$_2$: ०जनकत्वं लक्षणं
146. AVM$_1$: ०लक्षणकर्मत्वमर्थः
147. AVM$_2$: लभ्यमिति कश्चित्
148. AVM$_2$: तन्न
149. AVM$_1$: द्वितीयादेः
150. AV(K) and AVM$_1$: ०द्यलाभेन. Changed according to AVT(B). AVM$_2$: नियतसंयोगाद्यलाभात्
151. AV(K) : पर्यायत्वापत्तेः, AVM$_2$: पर्यायतापातात्
152. AVM$_1$: तथापि
153. AVM$_1$ omits फल. AVM$_2$: संयोगशालित्वं
154. AVM$_1$: adds तवापि before कुतः
155. AV(K) : स्वर्गादिजनकत्वं
156. AV(P) : ०रिष्टत्वफलत्वाभ्यां
157. AVM$_1$: संयोगत्वस्वर्गत्वाभ्यां
158. AV(P) : बुद्धिविषयतावाचकतदादेरिव
159. AVM$_1$ omits the word.
160. AVM$_1$: ०फलशालित्वं, AVM$_2$: ०फलशालित्वं मात्रम्
161. AVM$_2$: त्यजेः कर्मत्वस्य उत्तरस्मिन्
162. AVM$_1$ omits the word.
163. AVM$_1$: स्पन्देश्च, AVM$_2$: स्पन्दे च कर्मत्वस्य
164. AVM$_1$ omits देश.
165. AV(K) : जानात्यादेः
166. AVM$_1$ and AVM$_2$: तादृशधातुयोग, AV(K) : तादृशप्रयोग
167. AVM$_2$: कर्मप्रत्ययः
168. AVM$_2$: न
169. AVM$_1$: ०काङ्क्षादिवैचित्र्याद्
170. AVM$_1$: धात्वर्थावच्छेदकेऽन्वेति, AVM$_2$: धात्वर्थावच्छेदके फलेऽन्वेति
171. AVM$_2$: इत एव अस्याः
172. AVM$_1$: ०धेयत्वबोधकसप्तमीतो भेदः, AVM$_2$: ०बोधिकायाः सप्तमीतो भेदः
173. AVM$_2$: omits the word.
174. AVM$_2$: आस्तां
175. AVM$_1$: धातोरर्थौ, AVM$_2$: अपृथगेव धातोरर्थौ for पृथगेव धात्वर्थौ

176. AVM_2 omits बल०
177. AVM_2 : जहाति
178. AVM_1 : आत्मानम्
179. AVM_1 omits आदि० AVM_2 : इत्यन्वयबोधात्
180. AV(K) : यत् यत्
181. AVM_1 and AVM_2 : प्रकृत्यर्थापेक्षिकं, AV(K) : सविषयकपदार्था०
182. AVM_2 : प्रयुज्यते
183. AVM_2: चैत्रेण
184. AV(K): सविषयकपदा०
185. AVM_1 and AVM_2 : आश्रयत्वम्
186. AVM_2 : यदैकत्र
187. AVM_2 : क्रियते for क्रिया तत्र
188. AVM_1 : विषयिता
189. AVM_2 : विषयिता
190. AVM_2 : क्रियते for क्रिया तत्र
191. AVM_1 omits the word.
192. AVM_1 omits इति.
193. AVM_2 omits the word.
194. AVM_2 adds च after the word.
195. AVM_2 : कर्मकर्तृकृति
196. AVM_1 andAVM_2 : इत्यादौ च
197. AVM_1 and AVM_2: ०नोपस्थापिते
198. AVM_2 : विषयित्वे
199. AVM_1 and AVM_2 : अपि तु for किन्तु
200. AVM_1 : पदस्वभावात्
201. AVM_2: धात्वर्थः
202. AVM_2: तदनुकू०
203. AVM_1 and AVM_2 : सम्बन्धमर्यादया
204. AVM_2: ०साधनत्वादिकपदोपात्तत्वात् प्रत्यासत्त्या
205. AVM_1 omit the word.
206. AVM_2 : फलसत्त्वेऽपि
207. AVM_1 : इव तस्मिन्
208. AVM_1 : ०मित्यादिः।
209. AVM_1 and AVM_2 : फलनिष्ठं चाधेयत्वं
210. AVM_1 : व्यापारनिष्ठत्वं
211. AVM_1 : मैत्रः
212. AVM_1 : मैत्रः for चैत्रः, AVM_2 : ०व्यापारविशेषवांश्चैत्रः
213. AVM_2 : चैत्रेण
214. AVM_2 : इत्यस्य च
215. AVM_2 : चैत्र for मैत्र
216. AVM_1 : विशेष्यविशेषण for विशेषणविशेष्य
217. AVM_2 : ०प्रत्ययस्य व्यवहारः
218. AVM_2 : व्यापारार्थः for व्यापार एवार्थः
219. AVM_1 omits the word.
220. AV (K), AV(P) and AVM_1 omit the word.
221. AVM_1 : इत्यादौ च, AVM_2 adds तण्डुलः before पक्वः.

222. AVM_2 omits स्तां वा.
223. AVM_1 ends at ०योगव्यव. AVM_2 : व्यवच्छेदौ
224. AVM_2 : अन्यथा अन्ययोग . . . . च्छेदकमात्रस्या.
225. AVM_2 : ०वच्छिन्नत्वप्रतियोगिक.
226. AVM_2 : शक्यासिद्धिः
227. AVM_2 : बाधितं
228. AVM_2 : ०व्यवच्छेदकप्रत्ययप्रसङ्गाच्च
229. AVM_2 : व्यवच्छेद्यत्वेन
230. AVM_2 : शक्यत्वेन
231. AV(K) and AVM_2 : ०च्छक्यानन्त्यं, AV(P) : शक्त्यानन्त्यम्, Changed according to AVT(B). AVM_2: स्वत्वस्य च for च स्वत्वस्य
232. AVM_2 omits आदि.
233. AVM_2 : अभावस्य प्रतीतिः
234. AVM_2 adds संयुक्त after संयुज्यते.
235. AVM_2 : संयोगमात्रप्रतोतेश्च
236. AVM_2 omits the word.
237. AVM_2 : सकर्मत्वम्
238. AVM_2 : घञादिप्रयोगः साधुत्वार्थमात्रम्
239. AVM_2 : ०मतानुसारिणः
240. AVM_2 : ०यत्नानुभव.
241. AVM_2 omits the word.
242. AVM_2 omits क्वचिदाश्रयत्वादिकम् and वा.
243. AVM_2 adds क्वचित् before इति
244. AVM_2 omits the word.
245. AVM_2 : ०यत्नानुभव.
246. AVM_2 : इति श्रीतार्किकशिरोमणिभट्टाचार्यकृत आख्यातवादः समाप्तः।। श्रीकालिकायै जगन्मात्रे नमो नमः।।

भवानन्दसिद्धान्तवागीशकृता
आख्यातवादटिप्पनी

।।ओं दुर्गायै नमः।।

१. **आख्यातस्ये**ति। आख्याततत्वं च लकारत्वं दशलकारसाधारणं तदज्ञानदशायां च शाब्दबोधस्तिप्त्वादिना शक्तिभ्रमादेवेति ध्येयम्।[1] **यत्नो** यत्नत्वविशिष्टः। इदं च जीवनयोनियत्ननिवृत्त्याख्ययत्नयोरनभ्युपगमे तदभ्युपगमे तद्व्यावृत्त-प्रवृत्तित्वमेव शक्यतावच्छेदकम्[2], तच्चेश्वरयत्नयाधारणं तेन "ईश्वरो वेदं वक्ति" इत्यादौ नानुपपत्तिः। **सर्वाख्याते**ति। सर्वजातीयाख्यातेत्यर्थः[3]। पक्ष्यति पाकं करिष्यति अपचत् पाकम् अकरोत् इत्यादिक्रमेण दशलकाराणामेव विवरणादित्यर्थः। **विवरणाद्** अर्थकथनात्।[4] ननु विवरणं शक्तिग्राहकं न, शब्दविषयाः शक्तेः पदार्थत्ववाक्यार्थत्वयोरभावादत आह–**व्यवहारादिवे**ति। तथा चानुमानविधयेति भावः। तच्च आख्यातं यत्नबोधकं बाधकाभावे सत्यभियुक्तैर्यत्नार्थकधातुना प्रतिपाद्यमानार्थकत्वात् इति क्रमेण बोध्यम्। **बाधकं विने**ति। तेन पचति पाकयत्नवानिति विवरणे धर्मिणो न वाच्यत्वम्। तत्रान्यलभ्यत्वस्यैव बाधकत्वात्। **व्युत्पत्तेः** शक्तिग्रहात्। ननु धर्मिण इव यत्नस्याप्यन्यलभ्यत्वमेव बाधकं पाकादिना क्रियाविशेषेण यत्नानुमानस्य वक्ष्यमाणत्वात् अत आह–**किं करोती**ति। किम्विषयकयत्नवानित्यर्थके प्रश्ने पाकविषयकयत्नार्थकत्वं विनानुपपत्तेरित्यर्थः। यद्रूपविशिष्टजिज्ञासितस्य सम्बन्धः प्रश्नवाक्येन प्रतिपद्यते तद्रूपविशिष्टे विशिष्टतत्सम्बन्धबोधेनैव प्रश्ननिवृत्तेः। आम्रस्य को रस इति प्रश्ने मधुर इत्यस्यापि रसपदावृत्त्या तादृशबोधजनकत्वादिति भावः। **अचेतने** सचेतनबोधकपदसमभिव्याहृते।।

२. एतन्मतं दूषयति–**अन्यदीये**ति। रथगमनानुकूलनोदनाभिघातसंयोगवति निश्चलेऽपि पुरुष इत्यर्थः। ननु गमनोपहितव्यापारस्य[5] लक्षणया बोधनेनैव नैष दोष इत्यतो **जानाती**त्यादि **द्वेष्टी**त्यन्तेन क्रियानुकूलकृतेर्बाधात् अप्रतीतेश्च[6]। तत्र ज्ञानाद्युपहितात्ममनोयोगादिबोधनेऽनतिप्रसङ्गादाह–**विद्यत** इत्यादि। अत्र च सत्ता विद्यमानकालसम्बन्धतः तदनुकूलव्यापाराभावस्तु[7] घटत्वादावतिस्फुट

एव। **निद्राती**ति। निद्रा च मेध्यान्तःकरणसंयोगः[8] तदनुकूलव्यापाराभावश्चात्मनि स्फुट एव, तदाश्रयत्वं च तादृशपरम्परया बोध्यम्। तेन मनो निद्रातीत्यादेर्न प्रसङ्गः। यद्यपि सुषुप्तिदशायां मेध्यान्तः-करणसंयोगाभावात्[9] निद्रातीति प्रयोगानुपपत्तिः तथापि मेध्यान्तरावच्छिन्नमनः-संयोग[10] एव निद्रा, तदानीमपि तदवच्छिन्नगगनादिसंयोगोऽस्तीति भावः। नन्वेतावता तादृशकृतौ व्यापारे वा मास्तु शक्तिः आश्रयत्वशक्तिस्तु कुत इत्यत आह—**गत्यादिमत्त्वे**ति। **मात्र**पदं तु व्यापारादिव्यवच्छेदकानुवादकमेव। **ज्ञाना**दिपदं आश्रयत्वं समवायेनावच्छेदकतया बोध्यम्। तेनात्मनि चैत्रशरीरे च जानातीत्यादेर्नानुपपत्तिः। **नश्यती**त्यादि। अत्र नाशप्रतियोगिनो घटादेर्नाशाश्रयत्वासम्भवात् तदाश्रयकपालादौ तदानीं नश्यतीत्यप्रयोगाच्च प्रतियोगित्वे लक्षणेत्यर्थः[11]। **निरूढे**ति। अनादिप्रयोगानुसारिणी लक्षणेत्यर्थः। तत्रानादिप्रयोगेऽपि यत्नत्वापेक्षया गौरवान्न[12] शक्तिः। यथा गुणवाचकशुक्लादिपदानां गुणिनीत्यर्थः। ननु चैत्रो जानातीत्यादौ आश्रयत्वादिसम्बन्धेन साक्षादन्वयोऽस्तु[13], अतएव[14] <u>मणिकृतो</u>ऽपि[15] तथैव वर्णयन्ति इत्यत आह—**चैत्र** इत्यादि[16]। यदि धात्वर्थप्रातिपदिकार्थयोर्भेदेन साक्षादन्वयबोधस्तदा तण्डुलपाकयोः कर्मत्व-स्य संसर्गविधया[17] भानात् तण्डुलीयपाकानुकूलकृतिमानित्याद्यः[18], चैत्रपाकयोः[19] कर्तृत्वस्य संसर्गविधया भानात् चैत्रीयपाकानुकूलव्यापारजन्यफलशाली[20] तण्डुल इति द्वितीयो[21] बोधः स्यादित्यर्थः। स्तोकं पचति इत्यादौ स्तोकपाकयोः साक्षादन्व- यबोधा**द्भेदेने**ति, तण्डुल[22] पचतीत्यादौ विभक्त्यर्थद्वारा[23] पाकादेरन्वयबोधात् **साक्षादि**ति[24]। **तद्भानस्य** आश्रयत्वादिभानस्य। अत्र अभेदातिरिक्तसम्बन्धेन[25] तण्डुलपदजन्यतण्डुलप्रकारकबोधं प्रति विभक्तिजन्या प्रत्ययजन्या वा[26] उपस्थितिः[27] कारणम्[28], समानविशेष्यकत्वं[29] प्रत्यासत्तिः। तेन पाकादेर्विभक्तिजन्योपस्थित्यभावात् तण्डुलः पचतीत्यादौ नान्वयबोधः। यद् वा तादृशसम्बन्धेन[30] तण्डुलपदजन्यकर्मताविशेष्यकतण्डुलप्रकारकशाब्दबोधं[31] प्रति तण्डुलपदोत्तरविभक्तिजन्यकर्मोपस्थितिः[32] कारणम्। एवं कारणत्वादौ विभक्त्यर्थे ऊह्यः।[33] तण्डुलः पचतीत्यादौ तथाविधफलाभावात् न[34] कार्यकारणभावान्तरं कल्प्यते[35]। यद् वा तण्डुलपदजन्यतण्डुलप्रकारकपाकविशेष्यकबोधं[36] प्रति विभक्तिजन्यपाकोपस्थितिः कारणम्, तादृशोपस्थितिस्तु लक्षणयैव सुलभा, तण्डुलः पचतीत्यादौ तादृशोपस्थित्यभावान्नान्वयबोधः। एवं धातुजन्यधात्वर्थप्रकारान्वयबोधं[37] प्रति विभक्तिजन्योपस्थितिः समानविशेष्यकत्वप्रत्यासत्त्या कारणं बोध्यम्[38]। तेन धात्वर्थस्यापि नामार्थे साक्षाद्विशेषणतया[39] न भानमिति <u>मणिकृतां</u> पुनराशयः[40]। तण्डुलः पचतीत्यादौ[41] तादृशबोधापत्तिभयेन[42] नामार्थस्य[43] धात्वर्थे साक्षादन्वयबोधबाधकः[44] पूर्वकार्यकारणभावोऽस्तु[45], चैत्रो जानातीत्यादौ

धात्वर्थस्य साक्षान्नामार्थे[46] भानेऽतिप्रसङ्गाभावादुत्तरः[47] कार्यकारणभावः किमर्थं[48] कल्पनीयः? न च चैत्रो[49] जानातीत्यादौ धात्वर्थस्य क्वचिदेवान्वयबोध[50] इति नियमोपपादनाय अवश्यं तदादर इति वाच्यम्। तत्र धातुजन्यज्ञानादि-प्रकारकबोधं प्रति[51] प्रथमान्तपदोपस्थितेरेव[52] नियामकताया आवश्यकत्वात्। अन्यथा आश्रयत्वलक्षणावादिनामपि[53] आश्रयत्वस्य तथाविधनियमोपपादनाय तन्नियामकताया अवश्याभ्युपेयत्वादिति युक्तः पन्थाः[54]। न च चैत्रः पचति तण्डुलः इत्यादावाख्यातेन कर्मत्वानभिधानात्[55] द्वितीयायाश्चैत्रः पच्यते इत्यादावपि कर्तृत्वस्यानभिधानात् तृतीयाया एवासाधुत्वज्ञानादेव[56] नैतादृशप्रयोगादन्वयबोध[57] इति वाच्यम्। एवमप्यसाधुत्वज्ञानाभावदशायां तथान्वयबोधस्य दुर्वारत्वात्। वस्तुतस्तु अनभिहिते कर्मत्वे तत्प्रकारक-बोधे[58] एव द्वितीया साधुः। अतः कर्मत्वादिसंसर्गबोधे[59] द्वितीयादेर्न प्रसक्तिरिति[60]।।

३. आख्यातस्य यत्नवाचकत्वम्[61], करोतेर्यत्नार्थकत्वे स्यात्, तदेव तु[62] कुत इत्यत आह—**कृञश्चे**ति। कृञो यत्नार्थकत्वे

कृताकृतविभागेन कर्तृरूपव्यवस्थया[63] [ ]

इत्याचार्ययुक्तिं दर्शयति—**क्रिये**त्यादिना। क्रिया संयोगादिरूपा, अङ्कुरस्यापि ईश्वरयत्नजन्यत्वात् तत्प्रतिसन्धानेन कृतव्यवहाराच्च[64] प्रतिसन्धान-पर्यन्तानुसरणम्[65]। कर्तृरूपव्यवस्थामाह—**ज्ञात्रादी**ति। अन्यथा कर्तरि कृतः[66] कृत्याश्रयबोधकत्वे कृञो यत्नार्थबोधकत्वे[67] च कृतिकर्ता इत्यन्वयबोधः स्यादिति भावः। **आश्रयपरे**ति। सविषयकधातूत्तरकर्तृकृतामाश्रया[68] एव निरूढलक्षणया[69] ज्ञात्रादिस्थलेऽपि[70] क्ळृप्तत्वात् कृञो यत्नार्थकत्वे तृजश्चाश्रयकत्वे[71] कृत्याश्रयकर्तृपदार्थः[72] स्यादित्यर्थः। **क्रियाया** इत्यादि। प्रथमे **तदाश्रयः** क्रियाश्रयः[73], द्वितीये **कारकमात्रं कर्तृपदार्थः स्यात्**, क्रियानुकूलव्यापारस्य सर्वकारकसाधारण्यादित्यर्थः। अङ्कुरः[74] कृत इत्युक्ते ईश्वरयत्नकत्वमादाय[75] उपपत्तेः सम्भवात्[76] **बीजादिने**ति। **तस्य** कृञः। **यदी**ति[77]। वस्तुतोऽचेतनेऽपि[78] रथादौ कारकमात्रे च कर्तृपदप्रयोग इति। तदुक्तम्—

स्वव्यापारे च कर्तृत्वं सर्वत्रैवास्ति कारके [ ]

इत्यादि[79]। **तत्प्रयोगः** कर्तृपदप्रयोगः। आख्यातस्यानुकूलव्यापारार्थकत्वे युक्तिमाह[80]—**एवं चे**त्यादिना। एवं कृञो यत्नार्थकत्वसिद्धौ[81] अचेतने काष्ठादौ रथो गच्छतीत्यादौ गत्यादिमत्त्वप्रतीतेराश्रयत्वलक्षणाया[82] एव उभयसम्मत-

एव। **निद्राती**ति। निद्रा च मेध्यान्तःकरणसंयोगः[8] तदनुकूलव्यापाराभावश्चात्मनि स्फुट एव, तदाश्रयत्वं च तादृशपरम्परया बोध्यम्। तेन मनो निद्रातीत्यादेर्न प्रसङ्गः। यद्यपि सुषुप्तिदशायां मेध्यान्तः-करणसंयोगाभावात्[9] निद्रातीति प्रयोगानुपपत्तिः तथापि मेध्यान्तरावच्छिन्नमनः-संयोग[10] एव निद्रा, तदानीमपि तदवच्छिन्नगगनादिसंयोगोऽस्तीति भावः। नन्वेतावता तादृशकृतौ व्यापारे वा मास्तु शक्तिः आश्रयत्वशक्तिस्तु कुत इत्यत आह—**गत्यादिमत्त्वे**ति। **मात्र**पदं तु व्यापारादिव्यवच्छेदकानुवादकमेव। **ज्ञाना**दिपदं आश्रयत्वं समवायेना-वच्छेदकतया बोध्यम्। तेनात्मनि चैत्रशरीरे च जानातीत्यादेर्नानुपपत्तिः। **नश्यती**त्यादि। अत्र नाशप्रतियोगिनो घटादेर्नाशाश्रयत्वासम्भवात् तदाश्रय-कपालादौ तदानीं नश्यतीत्यप्रयोगाच्च प्रतियोगित्वे लक्षणेत्यर्थः[11]। **निरूढे**ति। अनादिप्रयोगानुसारिणी लक्षणेत्यर्थः। तत्रानादिप्रयोगेऽपि यत्नत्वापेक्षया गौरवान्न[12] शक्तिः। यथा गुणवाचकशुक्लादिपदानां गुणिनीत्यर्थः। ननु चैत्रो जानातीत्यादौ आश्रयत्वादिसम्बन्धेन साक्षादन्वयोऽस्तु[13], अतएव[14] <u>मणिकृतो</u>ऽपि[15] तथैव वर्णयन्ति इत्यत आह—**चैत्र** इत्यादि[16]। यदि धात्वर्थप्रातिपदिकार्थयोर्भेदेन साक्षादन्वयबोधस्तदा तण्डुलपाकयोः कर्मत्व-स्य संसर्गविधया[17] भानात् तण्डुलीयपाकानुकूलकृतिमानित्याद्यः[18], चैत्रपाकयोः[19] कर्तृत्वस्य संसर्गविधया भानात् चैत्रीयपाकानुकूलव्यापारजन्यफलशाली[20] तण्डुल इति द्वितीयो[21] बोधः स्यादित्यर्थः। स्तोकं पचति इत्यादौ स्तोकपाकयोः साक्षादन्व- यबोधा**द्भेदेने**ति, तण्डुल[22] पचतीत्यादौ विभक्त्यर्थद्वारा[23] पाकादेरन्वयबोधात् **साक्षादि**ति[24]। **तद्भानस्य** आश्रयत्वादिभानस्य। अत्र अभेदातिरिक्तसम्बन्धेन[25] तण्डुल-पदजन्यतण्डुलप्रकारकबोधं प्रति विभक्तिजन्या प्रत्ययजन्या वा[26] उपस्थितिः[27] कारणम्[28], समानविशेष्यकत्वं[29] प्रत्यासत्तिः। तेन पाकादेर्विभक्तिजन्यो-पस्थित्यभावात् तण्डुलः पचतीत्यादौ नान्वयबोधः। यद् वा तादृशसम्बन्धेन[30] तण्डुलपदजन्यकर्मताविशेष्यकतण्डुलप्रकारकशाब्दबोधं[31] प्रति तण्डुलपदोत्तर-विभक्तिजन्यकर्मोपस्थितिः[32] कारणम्। एवं कारणत्वादौ विभक्त्यर्थे ऊह्यः।[33] तण्डुलः पचतीत्यादौ तथाविधफलाभावात् न[34] कार्यकारणभावान्तरं कल्प्यते[35]। यद् वा तण्डुलपदजन्यतण्डुलप्रकारकपाकविशेष्यकबोधं[36] प्रति विभक्तिजन्य-पाकोपस्थितिः कारणम्, तादृशोपस्थितिस्तु लक्षणयैव सुलभा, तण्डुलः पचतीत्यादौ तादृशोपस्थित्यभावान्नान्वयबोधः। एवं धातुजन्यधात्वर्थप्रकारान्वय-बोधं[37] प्रति विभक्तिजन्योपस्थितिः समानविशेष्यकत्वप्रत्यासत्त्या कारणं बोध्यम्[38]। तेन धात्वर्थस्यापि नामार्थे साक्षाद्विशेषणतया[39] न भानमिति <u>मणिकृतां</u> पुनराशयः[40]। तण्डुलः पचतीत्यादौ[41] तादृशबोधापत्तिभयेन[42] नामार्थस्य[43] धात्वर्थे साक्षादन्वयबोधबाधकः[44] पूर्वकार्यकारणभावोऽस्तु[45], चैत्रो जानातीत्यादौ

धात्वर्थस्य साक्षान्नामार्थे[46] भानेऽतिप्रसङ्गाभावादुत्तरः[47] कार्यकारणभावः किमर्थं[48] कल्पनीयः? न च चैत्रो[49] जानातीत्यादौ धात्वर्थस्य क्वचिदेवान्वयबोध[50] इति नियमोपपादनाय अवश्यं तदादर इति वाच्यम्। तत्र धातुजन्यज्ञानादि-प्रकारकबोधं प्रति[51] प्रथमान्तपदोपस्थितेरेव[52] नियामकताया आवश्यकत्वात्। अन्यथा आश्रयत्वलक्षणावादिनामपि[53] आश्रयत्वस्य तथाविधनियमोपपादनाय तन्नियामकताया अवश्याभ्युपेयत्वादिति युक्तः पन्थाः[54]। न च चैत्रः पचति तण्डुलः इत्यादावाख्यातेन कर्मत्वानभिधानात्[55] द्वितीयायाश्चैत्रः पच्यते इत्यादावपि कर्तृत्वस्यानभिधानात् तृतीयाया एवासाधुत्वज्ञानादेव[56] नैतादृशप्रयोगादन्वयबोध[57] इति वाच्यम्। एवमप्यसाधुत्वज्ञानाभावदशायां तथान्वयबोधस्य दुर्वारत्वात्। वस्तुतस्तु अनभिहिते कर्मत्वे तत्प्रकारक-बोधे[58] एव द्वितीया साधुः। अतः कर्मत्वादिसंसर्गबोधे[59] द्वितीयादेर्न प्रसक्तिरिति[60]।।

३. आख्यातस्य यत्नवाचकत्वम्[61], करोतेर्यत्नार्थकत्वे स्यात्, तदेव तु[62] कुत इत्यत आह—**कृञश्चे**ति। कृञो यत्नार्थकत्वे
कृताकृतविभागेन कर्तृरूपव्यवस्थया[63] [ ]
इत्याचार्ययुक्तिं दर्शयति—**क्रिये**त्यादिना। क्रिया संयोगादिरूपा, अङ्कुरस्यापि ईश्वरयत्नजन्यत्वात् तत्प्रतिसन्धानेन कृतव्यवहाराच्च[64] प्रतिसन्धान-पर्यन्तानुसरणम्[65]। कर्तृरूपव्यवस्थामाह—**ज्ञात्रादी**ति। अन्यथा कर्तरि कृतः[66] कृत्याश्रयबोधकत्वे कृञो यत्नार्थबोधकत्वे[67] च कृतिकर्ता इत्यन्वयबोधः स्यादिति भावः। **आश्रयपरे**ति। सविषयकधातूत्तरकर्तृकृतामाश्रया[68] एव निरूढलक्षणया[69] ज्ञात्रादिस्थलेऽपि[70] क्लृप्तत्वात् कृञो यत्नार्थकत्वे तृजश्चाश्रयकत्वे[71] कृत्याश्रयकर्तृपदार्थः[72] स्यादित्यर्थः। **क्रियाया** इत्यादि। प्रथमे **तदाश्रयः** क्रियाश्रयः[73], द्वितीये **कारकमात्रं कर्तृपदार्थः स्यात्**, क्रियानुकूलव्यापारस्य सर्वकारकसाधारण्यादित्यर्थः। अङ्कुरः[74] कृत इत्युक्ते ईश्वरयत्नकत्वमादाय[75] उपपत्तेः सम्भवात्[76] **बीजादिने**ति। **तस्य** कृञः। **यदी**ति[77]। वस्तुतोऽचेतनेऽपि[78] रथादौ कारकमात्रे च कर्तृपदप्रयोग इति। तदुक्तम्—

स्वव्यापारे च कर्तृत्वं सर्वत्रैवास्ति कारके [ ]

इत्यादि[79]। **तत्प्रयोगः** कर्तृपदप्रयोगः। आख्यातस्यानुकूलव्यापारार्थकत्वे युक्तिमाह[80]—**एवं चे**त्यादिना। एवं कृञो यत्नार्थकत्वसिद्धौ[81] अचेतने काष्ठादौ रथो गच्छतीत्यादौ गत्यादिमत्त्वप्रतीतेराश्रयत्वलक्षणाया[82] एव उभयसम्मत-

त्वादुपेक्षितम्[83]। **जनकव्यापार** इति। व्यापारत्व[84] संयोग- यत्नस्पन्दादिसाधारणं जन्यभावत्व[85] ईश्वरकर्तृकेऽपि कार्ये ईश्वरस्यापि संयोगलक्षणव्यापार-वत्त्वान्नातिप्रसङ्गः[86]। तण्डुलक्रयणादेरपि पाकजनकव्यापारवत्त्वात्[87] तदानीमपि पचतीत्यादिप्रयोगापत्ति[88] वारयति-**तण्डुलक्रयणादेश्चे**ति।।

४. **तर्ही**ति। आख्यातस्य यत्नबोधकत्वे[89] इत्यर्थः। **पाकादिने**ति। तादात्म्येनेति[90] हेतुत्वाभिप्रायेण[91]। इत्यरथा तु[92] पाको यत्नजन्यः तादृशपाकत्वादिति क्रमेण बोध्यम्। ननु करोतिना विवरणादाख्यातस्य यत्नवाचकत्व[93] वास्तु[94] पचति पाकजनकयत्नवानिति विवरणात् तथा स्यादत आह-**पचती**ति। **तात्पर्ये**ति। अनुमानलभ्यत्वादिति[95] भावः। **एवं यत्नस्या**नुमानिकत्वेन[96]। **तस्य** यत्नस्य। नन्वध्याहृतयत्नपदार्थे[97] वर्तमानत्वान्वयो[98] भविष्यतीत्याशङ्क्य निरस्यति–**अन्यत्रे**ति[99]। **अन्यत्र** चैत्रः पचतीत्यादेरन्यत्र **धात्वर्थक्रियायां** जानातीत्यादौ, **स्वार्थव्यापारे** काष्ठं पचतीत्यादौ। तथाचाध्याहृतपदार्थे[100] यत्नेन लडर्थवर्तमानत्वान्वयधीः।

आश्रयत्वबोधकाख्यातपदजन्यवर्तमानत्वप्रकारान्वयबोधे[101] प्रकृतीभूत-धातुजन्योपस्थिते-र्व्यापार-बोधकाख्यात-जन्य-वर्तमानत्व-प्रकारान्वय-बोधे[102] आख्यात-जन्यव्यापारोपस्थितेः समानविशेष्यकतया हेतुत्वकल्पनात्[103]। पूर्वोक्तरीत्या तस्यापि[104] निष्कर्षो बोध्यः। ननु[105] पाकजनकवर्तमान-यत्नतथाविधव्यापारयोश्च कालिकी व्याप्तिः[106], तथाचाख्यातेन तादृशव्यापारे बोधिते[107] अयं कालः पाकजनकवर्तमानयत्नवान् तथाविधव्यापारवत्त्वादित्यनुमानं भविष्यतीत्याशङ्क्य निषेधति-**न चे**त्यादिना। **यत्नविगमेऽपी**ति। तथाच न कालिकी व्याप्तिरिति भावः[108]। व्यापारस्य संयोगादिलक्षणस्यानुवृत्तेर्न तादृशव्याप्तिरिति भावः। ननु स्थूलकालमादाय तथा व्याप्तिर्भविष्यति इत्यतो[109] दोषान्तरमाह[110]-**धर्मिविशेषे**ति[111]। **तद्व्यधिकरणे**ति[112]। **तद्व्यधिकरणस्य**[113] यत्नव्यधिकरणस्य[114] काष्ठादिव्यापारस्य। तथाच दैशिकव्याप्त्यापि[115] न[116] तथोपपत्तिरिति भावः। चैत्रः पाकजनकवर्तमानयत्नवान्[117] चैत्रत्वे सति पाकजनकवर्तमानव्यापारवत्त्वादिति[118] दैशिकव्याप्तिमूलकमनुमानमाशङ्क्य[119] निषेधति-**चैतन्ये**त्यादिना।[120] **तेन** पाकजनकवर्तमानव्यापारेण। **चैत्रत्वाद्य-प्रतीताविति**[121] शब्दात् तत्प्रतीतिर्नास्त्येव[122] उपायान्तरात् तत्प्रतीतिस्तु न सावत्रिकी, तादृशयत्नवत्त्वप्रतीतिस्तु सर्वत्रैवेति तदर्थं तत्र शक्तिः स्वीकार्येति भावः। **शोभन** इति। शोभनत्वस्य स्थाल्यादि-साधारणत्वात् शोभनत्वे सति तादृशव्यापारवत्त्वं न यत्नानुमापकमिति भावः[123]। **लाक्षणिकत्वादि**ति। तादृशयत्नबोधस्य प्रकारान्तरेणानुपपत्तेर्लक्षणायां वर्तमानत्वान्वयेऽपि[124] तत्र सुघट एवेति[125] भावः।।

५. व्यापारे शक्तावपि न सर्वत्र शक्त्या प्रयोगोपपत्तिः[126], तथाच लाघवं किमित्यतो न कृतमित्याशयेनाह[127]—**मैवमित्यादि**[128]। **लाघवेने**ति। व्यापारत्वस्य जन्यत्वात्मकतया[129] यत्नत्वस्य[130] जातित्वाल्लाघवमिति भावः। शङ्कते—**यत्नमि**ति। **लाघवात्** जनकयत्नत्वापेक्षया जनकत्वस्य[131] लघुत्वात्[132]। **अचेतनेऽपी**ति। स्थाल्यादावपि, पाकजनकसंयोगादेः सत्त्वादिति भावः। यत्नशक्तावपि[133] अदृष्टजनककृतिकाले[134] पचतीतिप्रयोगापत्तिं[135] वारयति—**पाकजनके**त्यादिना।[136] अतएवादृष्टजनककृतेस्तदहष्टजन्यकार्यं प्रति अजनकत्वादेव। **तज्जनके**ति। क्षित्यादिजनकेत्यर्थः। ननु कृतीष्टसाधनतावादिमते तादृशकृतेः[137] क्षित्यादिजनकत्वस्य वेदेनैव[138] बोधनात् कथं नार्थान्तरम् अत आह—**भावे वे**ति। **त्वयापि**[139] जनकशक्तिवादिना[140] अपि। स्वमतमाह—**यत्नमात्रमि**ति। **विषयित्वम्**[141] अजनकेऽपीत्यतो **जनकत्वमि**ति। तस्य स्वरूपसम्बन्धविशेषोऽन्यथा वास्तु[142] उभयथापि सम्बन्धविधया तस्य भानं[143] न विरुद्धमिति भावः। जनकत्वं च चेष्टादिद्वारा विलक्षणमेव[144] संसर्गतया भासते। अतएवास्मदादिकर्तृके ईश्वरः पचतीत्यादेर्न प्रसङ्गः[145]।

६. **सामानाधिकरण्ये**ति[146]। नामाख्यातयोर्भिन्नप्रवृत्तिनिमित्तयोरेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम्। आख्यातस्य यत्नाद्याश्रयबोधकत्वं विना अनुपपन्नमिति भावः। **अन्यथा** कर्तृकर्मणोरनभिधाने। **तयोः** तृतीयाद्वितीययोः[147] **अनभिहिताधिकारीयत्वात्** कर्तृकर्मणोरनभिधान एवानुशिष्टत्वात्[148]। ननु कृत्यनभिधान एव तृतीयेति न तदनुरोधेन[149] कर्तरि शक्तिसिद्धिरत[150] आह-**कृत्यभिधानस्य**[151] इति। **अविशिष्टत्वात्** कर्तृकर्माख्यातसाधारणत्वात्[152]। तथाच तत्रापि तृतीया न स्यादिति भावः। इदं च प्राचां मते। स्वमते तु[153] तृतीययैव कृत्यभिधानात्[154]। **नियमः** अभिहितानभिहितनियमः। तथाचाख्यातेनानभिहितत्वात्[155] कर्तृसंख्यायां तृतीया कर्मसंख्यायां च द्वितीयेति भावः। "सर्वं हि वाक्यं क्रियया परिसमाप्यते" इति न्यायेन चैत्रः सुन्दर इत्यादि[156] वाक्ये अस्तीत्यादिपदाध्याहारे[157] तिङर्थसंख्याया एव बोध इति कदाचित् भ्रमात् अतस्तदुपेक्ष्य सक्रियमेव वाक्यमुदाहरति-**चैत्रेण दृष्टो घट** इति। **न तदभिधायकत्वं** न संख्याभिधायकत्वम्। तथाच चैत्रः पचतीत्यादावपि तृतीया स्यादिति भावः। **तादृशसुपं** द्वित्वबोधकसुपम्। न चैकवचनस्य[158] द्वित्वे लक्षणा, सुब्विभक्तौ लक्षणाया असाधुत्वात्[159]। अतएव

द्व्येकयोर्द्विवचनैकवचने [पा. सू. 1-4-22]

इति सूत्रं[160] नियमपरतया[161] व्याख्यातं शाब्दिकैः। एवं चैत्रपदोत्तरसुपस्तथा

लक्षणायां चैत्रद्वयं मैत्रपदोत्तरसुपश्च लक्षणायां मैत्रद्वयमित्यादिकं[162] प्रतीयेत। न च[163] **चैत्रमैत्रोभयम्, सुब्विभक्तेः** प्रकृत्यर्थमात्रगतत्वार्थबोधकत्वनियमात्। न चैकवचनेन एकत्वरूपेणोपस्थापिते चैत्रमैत्रे[164] कथं तिबुपस्थापित-विरुद्धद्वित्वान्वय[165] इति वाच्यम्। एकत्वस्य तत्राविवक्षितत्वात्। विवक्षितत्वेन वा एको[166] मैत्र एकश्चैत्रः उभौ गमनानुकूलकृतिमन्तौ इत्यन्वयबोधे बाधकाभावादिति भावः[167]। नन्वेकवचनेषु[168] तिबादिषु[169] एकत्वे शक्तिर्न[170] सिध्यति अत[171] आह-**लाघवादि**ति। सुत्वेन[172] अम्त्वेन टात्वादिना च[173] नानाशक्तिकल्पनामपेक्ष्य एकवचनत्वेन एकत्वे शक्तिकल्पने लाघवात्। तिबेकवचनस्यापि[174] सामान्यतः शक्तिसिद्धिरिति[175] भावः। एकवचनत्वं च एकवचनत्वेनाभियुक्तैः परिभाषितत्वम्-

तान्येकवचनद्विवचनबहुवचनानि [पा.सू. 1-4-102]

इति सूत्रे। तिबेकवचनद्विवचनबहुवचनानां[176] तथा परिभाषितत्वात् तद्ग्रहे[177] शक्तिभ्रमादेव व्यवहारः। एतेन एकवचनत्वं नैकत्वशक्तत्वं आत्माश्रयात्, नैकत्वबोधकत्वम्[178], पदमात्रस्यैव लक्षणादिना[179] एकत्वबोधकत्वादिति[180] दूषणमनवकाशम्। वस्तुतः पचतीत्युक्ते शक्त्या लक्षणया वा उपस्थिते कर्तरि[181] एकत्वस्यैव नियमतः प्रतीतेः एकत्वे सुप्त्वादिनैव[182] शक्तिः। न च न्यायमते[183] एकत्वविशिष्टकर्तर्येव लक्षणेति वाच्यम्, नियमतः प्रतीयमानेऽपि लक्षणायां यत्नेन[184] तथात्वस्य सुवचत्वात्। स्वस्तिष्ठतीत्यादावव्ययोत्तरं सुबनुसन्धानं विनापि एकत्वप्रतीतेरिति[185] स्थितम्। एकत्वे शक्तिरित्यप्याहुः[186]। **कर्तृसंख्या**[187] इत्यारभ्य **एतदपि**[188] **नास्ति** इत्यन्तमेकं मतम्। **कृते**ति। तदुत्तरसुप एव संख्योपस्थितिसम्भवे कृतः संख्यायां न[189] शक्तिरिति। तथाच[190] चैत्रो ग्रामं गतवानित्यादावपि तृतीया चैत्रेण ग्रामो गत[191] इत्यादावपि[192] द्वितीया स्यात् कृतोऽनभिहितकर्तृकर्मसंख्याकत्वादिति[193] भावः। ननु[194] आख्यात एवायमुक्तानुक्तविभागः[195] कृत्तद्धितसमासेषु[196] कर्त्रादेरभि-धानानभिधानाभ्यां नियमो भविष्यति। आख्यातकृत्तद्धितसमासभेदेन[197] अनभिहिते[198] [पा. सू. 2-3-1]

इत्यादिसूत्रार्थभेदोऽपि इष्ट एवेत्यतः [आह-] **किंचे**ति। **न नियमः** कर्त्राख्याते कर्तुरेव, कर्माख्याते कर्मण एव संख्याभिधानमिति नियमाभावः। तदेवाह-**पदार्थे**ति। **पदार्थतावच्छेदकावच्छिन्नस्य** एकत्वावच्छिन्नस्य।[199] **कर्तृकर्मसाधारण्येने**ति। तथाच तण्डुलं पचतीत्यत्रापि कदाचिदाख्यातेन तण्डुलसंख्याभिधाने तण्डुलः पचतीति स्यात्, चैत्रेण पच्यते तण्डुल इत्यत्रापि

कर्तृसंख्याभिधाने चैत्रः पच्यते तण्डुल इति च[200] स्यादिति भावः। ननु कर्त्रेकत्वत्वादिना[201] शक्तिबोधादेव[202] न कर्मादिसाधारण्यम् अत आह-**कर्त्रेके**ति[203]। न च मैत्रं ग्रामं नयति चैत्र[204] इत्यादौ कर्मणोऽपि कर्तृत्वात् कथं न[205] साधारण्यमिति वाच्यम्। तत्तत्क्रियाकर्त्रेकत्वत्वादिना[206] शक्यत्वात् एव[207] शक्त्यानन्त्यस्येष्टत्वात्[208]। **अभिधेयत्वं** विशेषणतयैवेति[209] शेषः। **शक्तौ गौरवं** कर्त्रेकत्वत्वेन कर्मैकत्वत्वेन[210] च विभिन्नशक्तिकल्पनात् एकत्वत्वापेक्षया[211] कर्त्रेकत्वत्वस्य शक्यतावच्छेदकत्वे गौरवम्। अस्मन्मते एकवचनत्व[212] तिप्त्वादिकं[213] वा शक्ततावच्छेदकं तन्मते तु कर्त्राख्यातैकवचनत्वादिकं कर्त्रादिविशेष्यकबोधजनकतिप्त्वादिकं वेति[214] शक्ततावच्छेदकमिति[215] गौरवमिति। ननु कर्त्रादिषु शक्त्यभ्युपगमेऽपि[216] कथं संख्यान्वयनियमः कथं वा न[217] गौरवमित्यत[218] आह-**तस्मादि**ति। **आत्मनेपदत्वेने**ति[219]। परस्मैपदस्य कर्मणि[220] कदाचिदप्यप्रयोगात्[221] इति[222]। **तत्तद्रूपेण** तिप्त्वादिना[223]। **एकपदे**ति। तथाच कर्त्राख्यातजन्यसंख्याप्रकारकबोधे[224] कर्माख्यातजन्यसंख्याप्रकारकबोधे[225] च तत्तदाख्यातजन्यकर्तृकर्मोपस्थितेः कारणत्वान्नान्यत्र संख्यान्वय इति भावः। **वाच्यगामित्वम्**[226] आख्यातवाच्यकर्तृकर्मविशेष्यकान्वयबोधविषयत्वम्। **अव्युत्पन्नमि**ति। आख्यातजन्ये कर्तृबोधे[227] कर्मतात्पर्यज्ञानस्य[228] तद्ग्राहकप्रकरणादेर्वा कर्मबोधे च[229] कर्तृतात्पर्यज्ञानस्य तद्ग्राहकप्रकरणादेर्वा[230] विरोधित्वं फलबलात् कल्प्यते इति भावः। यद्वा तदाख्यातजन्ये कर्तृबोधे[231] कर्मबोधकविभक्तिसमभिव्याहृताख्यातजन्यकर्त्रुपस्थितेः कर्मबोधे च तृतीयान्तपदसमभिव्याहृताख्यातजन्योपस्थितेः[232] कारणत्वम्, चैत्रश्चैत्रेण तण्डुलं तण्डुलः पक्ष्यत इत्यादिप्रयोगस्त्विष्ट एव उभयवाक्यार्थतात्पर्ये सर्वैरेवावृत्त्या तादृश- समूहालम्बनबोधोपगमादिति। **चैत्रः पक्ष्यते तण्डुल** इति। पक्ष्यत इत्यस्य कर्तरि कर्मणि च साधुत्वात् उभयस्याभिधाने[233] उभयत्र प्रथमा स्यात्। चैत्रः[234] पाककर्ता तण्डुलः पाककर्म इत्याकारकश्चान्वयबोध इति भावः। ननु तथापि मैत्रः पच्यते तण्डुलमिति कर्तृमात्रबोधकत्वेन प्रयोगः स्यात् अत आह-**कर्तरी**ति। यथा च तथाविधकर्तृबोधे यगाद्यसमभिव्याहृताख्यातजन्यकर्त्रुपस्थितेः कारणत्वात् न तथाप्रयोग इति भावः।।

७. लाघवेन आख्यातस्य[235] यत्नमात्रशक्तौ कर्तृकर्मसंख्याभिधानानभिधानाभ्याम्[236] उक्तानुक्तविभागे संख्यायाः कर्तृकर्मसाधारण्येनान्वयबोधोपपादनमेव मूलबाधकमुद्धरति[237]-**भावने**ति। **समानपदे**ति। इदं चासत्तिकल्पने[238] उपजीव्यम्। एकस्यार्थस्यान्वयबोधानुरोधेनाव्यवधानेनान्वयप्रतियोगिनः[239] पदार्थान्तरस्योपस्थितेरावश्यकत्वे अर्थान्तरेणापि सामग्रीसत्त्वात् अन्वयबोध[240]

इति भावः। न च कृतिसाध्यत्वादिविशेष्यधात्वर्थे[241] संख्यान्वय इति[242] वाच्यम्, आख्यातजन्यसंख्यान्वयबोधे तज्जन्यभावनाप्रकारकसामग्र्या[243] एव नियामकत्वे तात्पर्यात्। भावनाया एवान्वये[244] किं नियामकं तद्दर्शयति- **भावनायाश्चे**ति। भावनायां विशेषणतया धात्वर्थस्यान्वयेन उक्तं नियामकमतो[245] **विशेष्यत्वेने**ति। कर्मत्वाद्यनवरुद्धं तदर्थविशेषणं[246] तेन तण्डुलादिव्युदासः। धात्वर्थस्य व्युदासायाह[247]-**प्रथमान्ते**ति। न च तदेवास्त्विति वाच्यम्, प्रथमान्तपदोपस्थाप्यत्वस्य नीलो घटोऽस्तीत्यादौ तादात्म्येन घटादिविशेषणे नीले चन्द्र इव मुखमस्तीत्यादौ च[248] चन्द्रे तत्सादृश्ये च सत्त्वात। तत्र च भावनान्वयविरहेण तद्बाधकत्वात् इतराविशेषणत्वरूपस्य[249] कर्मत्वाद्यनवरुद्धत्वस्य तत्राभावादिति। मन्मते अव्ययात् प्रथमैव तन्मते स्वस्तिष्ठति देव इत्यादावधिकरणत्वावरुद्धस्वर्गादिवारणाय तदिति कश्चित्। वस्तुतश्चैत्रः पचति तण्डुल इत्यादौ[250] प्रथमायां कर्मत्वशक्तिभ्रमेण तण्डुलकर्मकपाकानुकूलकृतिमानिति अन्वयबोधात् तण्डुलादिवारणाय **कर्मत्वाद्यनवरुद्ध** इति[251]। तथाचाख्यातजन्यभावनाप्रकारकबोधे समानविशेष्यत्वप्रत्यासत्त्या प्रथमान्तपदजन्योपस्थितिः कारणं विशेषणतया तदन्वयबोधजनकसमभिव्याहारस्य सहकारीति भावः[252]। ननु प्रथमान्तपदोपस्थाप्यत्वस्य[253] विशेषणत्वेनैव कुतो नान्वय इत्यत आह-**तथैवे**ति। विशेष्यत्वेनैवेत्यर्थः। तथैवानुभवादिति भावः। धात्वर्थस्यापि[254] भावनायामन्वितत्वात्[255] स एव विशेष्योऽस्त्वत आह-**धात्वर्थस्ये**ति। तथा च विशेषणतया धात्वर्थान्वयबोधे[256] आख्यातार्थभावनोपस्थितेः भावनाप्रकारकबोधे च प्रथमान्तपदजन्योपस्थितेः कारणत्वस्य क्लृप्तत्वात् अन्यत्र तदन्वये नियामकाभावादिति[257] भावः। नन्वनन्यगत्या भावाख्यात- जन्यभावनाप्रकारकबोधे[258] धात्वर्थोपस्थितेरेव कारणत्वरूपं व्युत्पत्त्यन्तरं[259] कल्प्यमत आह-**भावनाया** इति[260]। भावना आख्यातार्थः। स च प्रकृते आश्रयता, चैत्रः स्वपितीत्यादौ[261] कृतिव्यापारयोरप्रतीतेः। तथाच चैत्रेण सुप्यते इत्यादौ चैत्रवृत्त्याश्रयताया निरूपकत्वसम्बन्धेन[262] स्वापेऽन्वये चैत्रेण सुप्यते न मैत्रेणेत्यादौ[263] नञर्थान्वयानुपपत्तिः, निरूपकत्वसम्बन्धस्य अभावप्रतियोगितावच्छेदकत्वाभावात्।[264] एवं च चैत्रादिनिरूपिताश्रयताया धात्वर्थस्वापादौ[265] आश्रयत्वसम्बन्धेनान्वयो वाच्यः। तथाच **बाधात्**[266] चैत्राश्रयतायाः स्वापे गगनाश्रयतायाः स्थितौ बाधादित्यर्थः। **विशेष्यविरहात्** विशेष्यत्वेनान्वयधीविषयविरहात्[267]। **अतएव** संख्याया अनन्वितत्वादेव। **औत्सर्गिकं** प्रथमोपस्थितम्[268], तथैव साधुत्वादिति भावः[269]। **एवं** भावनाया अनन्वितत्वे। **यथायथ**मिति। वर्तमानत्वं लटः इष्टसाधनत्वं लिङ इत्यर्थः[270]।

इष्टसाधनत्वमपि भावप्रत्ययार्थ[271] इति बोधयितुमिदमुपन्यस्तम्। तदर्थस्तु[272] मणिकारमते तु[273] **धात्वर्थ एवे**ति। **आदिभ्याम्**[274] अतीतत्वादिकृतिसाध्यत्वपरिग्रहः। चैत्रेण सुप्यते इत्यादौ चैत्रवृत्तिवर्तमानस्वाप[275] इत्यन्वयबोधः। वृत्तित्वं तृतीयार्थः। चैत्रेण[276] सुप्येत चैत्रेण पच्येत इत्यादौ च चैत्रवृत्तिस्वाप इष्टसाधनं चैत्रवृत्तिकृतिसाध्यः पाक[277] इष्टसाधनमिति रीत्यान्वयबोधः[278]। **तदबोधकानां** वर्तमानत्वाद्यबोधकानाम्। **प्रयोगे**ति। पाक इत्यादौ केवलधातोरसाधुत्वादिति। नन्वाश्रयत्वसम्बन्धेन भावनाविशेष्यत्वस्य संख्यान्वयनियामकत्वे पच्यते तण्डुल इत्यादौ कथं तदन्वय इत्यत आह– **भावनाया** इति[279]। **अन्यथा** वक्ष्यमाणक्रमेण। तथाच साक्षात्परम्परासाधारणं भावनाविशेष्यकत्वमात्र[280] नियामकमिति भावः। **तव** वैयाकरणस्य[281]। यथा त्वन्मते परस्मैपदेन कर्मणोऽनभिधान[282] तथा मन्मते कृतेः[283] कर्मणि नान्वयः। यथा तव कर्तरि[284] यकोऽसाधुत्वं तथा **मम**आश्रयत्वसंसर्गेण[285] कृतेरन्वये यकोऽसाधुत्वम्। यथा तवैकदा उभयाबोधकत्वं[286] तथा ममैकदा उभयत्रान्वयबोध[287] इत्यर्थः। इति[288] क्रमेणोदाहरति–**मैत्रेणे**ति[289]। कृतेर्विषयतया तण्डुलेऽन्वये तण्डुलवृत्तिसंख्याया[290] उक्तत्वात् तत्र प्रथमा, मैत्रवृत्तिसंख्याया अनुक्तत्वात् तत्र तृतीया, मैत्रवृत्तिपाकभावनाविषयस्तण्डुल[291] इति चान्वयबोधः[292]। एवमन्यत्राप्यूह्यम्। **व्यापारे**ति आश्रयत्वादेरप्युपलक्षणं[293] तेन जानातीत्यादिपरिग्रहः[294]। कर्त्रादिशक्तौ वैयाकरणयुक्ति[295] दूषयति– **भिन्नाभ्यामि**ति। घटो घट[296] इत्यादौ सामानाधिकरण्याव्यवहारात् भिन्नाभ्यामिति। **बोधकत्वं** शक्तिलक्षणान्यतरसम्बन्धनप्रतिपादकत्वम्, न तु शाब्दधीजनकत्वम्, कृतिशक्तत्वेऽप्यविरोधादिति। **सिद्ध**मिति। तथाच तदनुरोधात् न कर्तरि शक्तिसिद्धिरिति[297] भावः। **अन्यादृशम्** एकवृत्तिधर्मद्वयबोधकत्वादिरूपम्। **न वार्यते** कृतिशक्त्येति शेषः। चैत्रपदेन चैत्रत्वस्याख्यातेन[298] तद्वृत्तिकृतेश्च बोधनादिति भावः[299]॥

८. कथं भावनाविशेष्यः[300]? अत्र[301] समाधानं शङ्कते–**विषयतयेति चे**दिति[302]। तदपि खण्डयति[303]–**सविषये**ति[304]। तत्र[305] गमनानुकूलव्यापारस्य नोदनाख्यसंयोगस्य विषयाप्रसिद्धेरिति भावः। सविषयनिर्विषयकव्यापाराभिधाने[306] भेदेनान्वयबोधभेदं दर्शयन्नाह–**अत्रे**त्यादिना। **भावनाविषय** इति। अत्र विषयत्वं संसर्गः, भावनाया एव साक्षादन्वयः कर्माख्यातस्थले[307] कर्मत्वबोधस्यानुभविकत्वादाह–**मैत्रनिष्ठे**त्यादि। **साक्षा**दिति प्रथमे। **परम्परये**ति द्वितीये। तत्र धात्वर्थादिना[308] व्यवधानादिति। **रथनिष्ठगमनानुकूलव्यापारे**ति। रथनिष्ठत्वं व्यापारान्वितं तत्रापि[309] कर्मत्वप्रत्ययानुरोधात्[310] रथनिष्ठव्यापारजन्यगमनजन्यफलशाली[311] ग्राम इति क्रमेणान्वयबोधः बोद्धव्यः[312]॥

९. प्राचां मतं दूषयितुं तद्रीत्यैव[313] वाक्यार्थं विवेचयति-**नव्यास्त्विति**[314]। कर्त्राख्याते आश्रयत्वस्य संसर्गत्वात् कर्माख्यातस्थले आधेयत्वस्य तृतीयार्थत्वे कर्त्राख्यातकर्माख्यातयोर्विशेषणविशेष्यभाववैपरीत्येन[315] तुल्यत्वात्[316] तथाविध-पदार्थबोधस्यानुभविकस्यानुपपत्तिगौरवं चेत्यत आह[317]-**संख्यामात्रं वेति**। मात्रपदेन[318] आधेयत्वादिव्यवच्छेदः। **सम्बन्धः** पाकानुकूलकृतौ मैत्रस्य सम्बन्धः। **वाक्यार्थ** इति। नामार्थस्य धात्वर्थेनैवान्वयस्याव्युत्पन्नत्वात् न त्वाख्यातार्थेनापीति भावः। **तथा** वाक्यार्थः। **तदपि** फलमपि। **प्रकारीति**। तथाचानुभवविरोधेन[319] न[320] तथेत्यर्थः। ननु धातोः फलावच्छिन्नक्रियावाचकत्वे[321] तत एव फललाभो भविष्यतीत्यत आह-**फलेति**। **विशेषणेति**[322]। फलस्य क्रियाविशेषणतयैव धातुशक्यत्वेन फलविशेष्यकक्रियाविशेषणकबोधस्याशक्यत्वात्[323] तस्य[324] धातुतोऽसाध्यत्वादिति भावः[325]। **इत्थं चेति**। फलस्य आत्मनेपदार्थत्वे[326] चेत्यर्थः[327]। **न लभ्येतेति**। कर्माख्यातस्थले परसमवेतक्रियाजन्यफलत्व-प्रकारकप्रतीतेः[328] सर्वानुभवसिद्धत्वादिति भावः। **भावनाया** इति। तथाच मैत्रनिष्ठभावनाविषयपाकजन्यफलशाली तण्डुल इत्यन्वय इति भावः।[329] सुबर्थभावनायां धात्वर्थस्य विशेषणत्वात्[330] इत्यत आह[331]-**तिङुपस्थापितेति**। तिङुपस्थापिवर्तमानत्वादौ धात्वर्थस्य विशेषणत्वादाह[332]-**भावनाया** इति[333]। **अन्यत्र**[334] पचतीत्यादौ। **भज्येतेति**। कृत्यर्थकाख्यातान्तधातुजन्यपाकप्रकारक-बोधे[335] आख्यातजन्यकृत्युपस्थितेः कारणत्वम्। आख्यातार्थान्तरे वर्तमानत्वादौ तदन्वयबोधातिप्रसङ्गवारणार्थं[336] **क्लृप्तमिति**। फले तदन्वये तद्भङ्गः। कार्यकारणभावान्तरकल्पनागौरवं[337] चेति भावः। प्राचां मतं दूषयित्वा स्वमतमाह-**तस्मादिति**[338]। मैत्रेण गतम्[339], चैत्रेण[340] पक्वास्तण्डुला इत्यादौ कृतेरन्यतोऽलाभात् तृतीयायां तत्र[341] शक्तिकल्पनमावश्यकमिति भावः। **व्युत्पन्नत्वादिति**। तृतीयाजन्यकृतिप्रकारकधातुजन्यपाकविशेष्यकबोधे[342] तृतीयाजन्यकृत्युपस्थितेः कारणत्वस्य च[343] चैत्रेण पक्वास्तण्डुला इत्यादौ कल्पनान्न व्युत्पत्तिविरोध इति भावः। **कर्तृकर्मवत्** कर्तृकर्मणोरिव **नातिप्रसङ्गः** चैत्रेण पचति तण्डुलस्तण्डुलं पक्ष्यते[344] चैत्रेण[345] इत्यादौ नातिप्रसङ्गः[346]। **न वेति**। एकदा कृतिफलयोरबोधकत्वादिति भावः। ननु[347] कर्माख्यातेन भावनानभिधाने भावनान्वयित्वस्य संख्यान्वयित्वनियामकत्वात्[348] तत्र किं नियामकमत आह-**तिङुपस्थाप्याया** इति। **भावनाया इवेति**। संख्यान्वयित्वमेव भावनान्वयित्वनियामकत्वं[349] किं न स्यादिति प्रतिबन्धिसूचनायाह[350]-**प्रथमान्तेति**। संख्यायाः कृतेश्चान्वये प्रथमान्त-पदोपस्थाप्यत्वमेव नियामकमिति भावः। ननु अचेतनानुरोधात् आख्यातार्थ-विशेष्यत्वं संख्यान्वयनियामकं तथाख्यातार्थे फलविशेष्येऽपि संख्यान्वये

प्राचीनव्युत्पत्तिबोध इति चेत्, न[351]। तथा सति वर्तमानत्वादिविशिष्टधात्वर्थेऽपि[352] संख्यान्वयापत्तेः। तृतीयार्थाख्यातजन्यसंख्यान्वयबोधे[353] कृतिप्रकारकबोधजनक-सामग्र्याः[354] एवं व्यापाराश्रयाद्यर्थकाख्यातस्थले[355] व्यापारप्रकारकबोधजनक-सामग्र्या[356] विशिष्टैकहेतुत्वकल्पनाया आवश्यकत्वात्। कर्माख्यातस्थले फलप्रकारकबोधजनकसामग्र्या एव तादृशबोधजन-कहेतुत्वकल्पने गौरवादिति[357]। नन्वेवामाख्यातवत् लाघवादिना कर्तृकर्मकृतोरपि कृतिफले एव[358] शक्ये स्यातामतस्तत्र धर्मिणि शक्तिं व्यवस्थापयति-**चैत्रो गन्ते**त्यादिना[359]। कर्तरि[360] कर्मणि च शक्तिप्रदर्शनाय[361] उदाहरणद्वयम्। उक्तरूपसामानाधिकरण्यस्य साधकत्वम्[362]। समानवचनलिङ्गत्वमपि[363] दर्शयति-**मित्रा पक्त्री**ति। समानलिङ्गकत्वमपि[364] आनुशासनिकं साधुत्वायैव[365] अभेदान्वयसाधकमिति[366] यदि ब्रूयात् तदा तन्मतनिराकरणाय अन्वयानुपपत्तिं दर्शयति-**भोक्ते**ति। अत्र[367] चैत्रादिपदस्यादिपदस्य[368] चार्थवशात्[369] नियमतोऽध्याहारे मानाभावात्[370]। भोजनानुकूलकृतिस्तृप्यति[371] पाकजन्यफलानि भुङ्क्ते पाककृतिरपसार्यताम् इत्यत्रानन्वयाद्धर्मिणि शक्तिरिति भावः। **सामानाधिकरण्ये**त्यादिना[372] भोक्ता तृप्यतीत्यादावन्वयबोधपरिग्रहः। ननु कर्तृकर्मशक्तौ कथं तदेकदेशकृतौ[373] कर्मत्वे च धात्वर्थस्यान्वय इत्यत आह-**चैत्रस्ये**त्यादि[374]। नप्तृपदस्य पुत्रपुत्रशक्तेस्तत्र[375] विशेष्य- चैत्रसम्बन्धान्वयात्[376] पुत्रेऽपि[377] तथा प्रयोगः स्यात्, पुत्रस्य चैत्रसम्बन्धवत्त्वात्[378]। अतो विशेषणीभूतपदार्थस्य[379] जन्यपुरुषस्यैकदेशे[380] जन्यत्वे चैत्रसम्बन्धान्वयः। तथाच चैत्रसम्बन्धिजन्यत्वाश्रयबोध इति भावः[381]। ननु तत्र जन्यत्वे पुरुषे च नप्तृपदशक्तिद्वयम्[382]। तथाच चैत्रस्य सम्बन्धस्य जन्यत्वे चैत्रसम्बन्धि-जन्यत्वस्य पुरुषे तादृशपुरुषस्य पुनर्जन्यत्वे तादृशजन्यत्वस्य पुनः[383] पुरुषेऽन्वये विनैव एकदेशान्वयं प्रागुक्तान्वयबोधो भवत्येव। एकपदोपात्तयोरप्यन्वयः कृतिवर्तमानत्वयोरिव व्युत्पत्तिविशेषबलान्नानुपपन्नोऽतः[384] स्थलान्तरमाह-**मैत्रादन्य**[385] इति। तत्र**अन्यादि**पदाना[386] भेदादिकमेव शक्यतावच्छेदकं न तु भेदाद्याश्रयत्वम्[387], गौरवात्, अननुभवाच्च। अतो न तत्र खण्डशक्तिसम्भावना। तत्रावधित्वे[388] पञ्चम्यर्थः। मैत्रावधिमत्त्वा-श्रयभेदवानित्यन्वयबोध इति भावः[389]। एवमन्यत्राप्यूह्यम्। **अपर** इति तत्रासुरादिवत्[390] पर्युदासनञा परत्वविरोधिगुण-वानित्यन्वयः[391] बोध्यते। तादृशविरोधिगुणे परत्वे[392] पञ्चम्यर्थान्वय इति भावः[393]। **अवच्छेदकेनैवे**त्येवकारेण पदार्थीभूतकर्त्रादिव्यवच्छेदः। ननु चैत्रस्य नप्ता सुन्दरः मैत्रादन्यो नित्य इत्यादौ विशेषणस्य[394] सुन्दरस्य नित्यस्य चान्वयात्। तत्र इतरपदार्थान्वये तद्विशेष्यकवृत्तिज्ञानजन्यतदुपस्थितेः[395] कारणत्वस्य कल्पनात् कथमेकदेशे तदन्वय इत्यत आह-**तथैवे**ति। एकदेशेनैवेत्यर्थः।

तथाचानुभवानुरोधादनन्यगतिकतया[396] च[397] षष्ठ्यादिभिन्न-पदार्थान्वयेऽतथोपस्थिते:[398] कारणत्वम्। नप्त्रादिपदार्थान्वये[399] विशेषणत्वेन[400] तदुपस्थितेरेव हेतुत्वम्। अतएव विशेष्ये[401] कदापि न तदन्वय:। एवं कर्त्रुपस्थापकतृजन्तधात्वर्थान्वयेऽपि विशेषणत्वेन कृत्युपस्थितेरेव हेतुत्वम्। अत: कर्तरि कदापि न[402] तदन्वय:। एवमन्यत्राप्यूह्यम्। क्लृप्तकार्यकारणभावस्य सङ्कोचे[403] कार्यकारणभावान्तर-कल्पने[404] च[405] गौरवादाह—**अस्तु वे**ति। कृतौ धात्वर्थानुकूलत्वभानस्यानुभविकस्योपपादनायाह[406]—**कृत्यादिघटित** इत्युक्तम्। **आदिभ्यां** फलतच्छालिनो: संग्रह:[407]। इत्थं च **पक्ते**त्यादौ पाकीय:[408] कर्तेत्याकारको बोध:[409]। सम्बन्धश्च स्वजनककृतिमत्त्वम्[410]। एवं च[411] चैत्रस्य नप्ता मैत्रादन्य इत्यादौ षष्ठीपञ्चम्यर्थयो:[412] स्वाश्रयजन्यतावज्जन्यताश्रय-पुरुषत्वेन स्वाश्रयभेदवत्त्वसम्बन्धेन भेदवति चान्वयो वाच्य:[413]। इत्थं च न कुत्राप्येकदेशान्वय इति। कर्माख्यातेन कृतेरबोधने फलस्य बोधने चानुगुणान्तरमाह[414]—**मुख्ये**ति। मुख्यकर्मत्वं फलवत्त्वात्[415] पच्यते तण्डुल इत्यादौ। भाक्तं तु विषयत्वादिरूपं ज्ञायते घट इत्यादौ। एवं मुख्यकर्तृत्वं चैत्र:[416] पचतीत्यादौ। भाक्तं च[417] स्थाली पचतीत्यादौ, जानातीत्यादौ च। आदिना[418] विषयत्वादिकरूपस्य[419] भाक्तकर्मत्वस्य व्यापाराश्रयत्वादिरूपस्य[420] भाक्तकर्तृत्वस्य संग्रह:। **विशेषणस्यापी**ति। विशिष्टस्यानतिरिक्तत्वात् विशेष्यतयैवाभिधानस्यानुक्तत्वात् विशेषणतयाभिधानेऽप्यभिधानमेवेति[421] भाव:। चैत्रेण भुक्त्वा[422] गम्यते इत्यादौ क्त्वाप्रत्ययेन कृतेरभिधानेऽप्याख्यातेन[423] तदनभिधानात् तृतीया, तादृश-कृत्यभिधानस्य अप्रयोजकत्वात्। वस्तुतश्चैत्रेण भुक्त्वा गम्यत इत्यादौ भोजनानन्तरगमनानुकूलकृतिरेव मुख्यं कर्तृत्वम्[424], तस्य च[425] कृता आख्यातेन[426] वाऽभिधानमेव। अतएव भोक्त्रा पक्त्वा चैत्रेणान्नं[427] भुज्यत इत्यादौ कृता[428] भोजनकृतेरेवाभिधानेऽपि[429] भोक्त्रभिन्न- चैत्रवृत्त्यन्नभोजनकृते:[430] प्रधानकर्तृत्वस्य भोक्त्रेत्यनेनानभिधानान्न तृतीयानुपपत्तिरेव[431]। एवमन्यत्राप्यूह्यम्॥

१०. **धातूत्तरे**ति। आख्यातक्त्वावुन्तुमादिषु प्रत्ययेषु[432] कृतिशक्तिकल्पनसमये आख्यातत्वादिकमपहाय लाघवादुक्तरूपेणैव तत्र[433] शक्ति: कल्प्यते इत्याशय:। **भावकृतोऽपी**ति। कर्मप्रत्ययेष्वपि कृतिशक्तिरस्त्येव। कृतिबोधे समभिव्याहार-विशेषो नियामक:। उभयबोधकसमभिव्याहारे च एकदा उभयबोध-कत्वान्नातिप्रसङ्ग: इति **तन्नो**क्तम्। भावकृत: कृतिशक्तत्वेऽपि समभिव्याहारविशेषभावान्न तद्बोध: इत्यस्यापि सुवचत्वादाह—**धातुत्वादी**ति[434]। धातुत्वं प्रत्ययत्वञ्चाभियुक्तानां तादृशपरिभाषाविषयत्वं तदपेक्षया लघुरूप-स्याख्यातत्वस्य लघुत्वादित्यर्थ:। धातुत्वं प्रत्ययत्वं च[435] तावदन्यतमत्वं तदपेक्षया आख्यातत्वस्य[436] तिबाद्यन्यतमत्वरूपस्य[437] लघुत्वादित्यर्थ: इति

तु[438] कश्चित्।

११. ये तु कर्तृकृतामपि विशेष्यशक्तिकल्पने[439] कृतावेव शक्तिः सामानाधिकरण्यानुरोधाद्विशिष्टे[440] लक्षणेति तन्मतं दूषयति[441]–**यदपी**ति। **कर्तृकृतोऽपी**ति। अत्र तृच्त्वादिकमेव शक्ततावच्छेदकमतो न गौरवमिति भावः। स्वयं वक्ष्यमाणस्य[442] **विशिष्टान्तराणामि**त्यत्र **अन्तर**पदस्य व्यावृत्तिं दर्शयितुं[443] गवादिपदे विशिष्टशक्तिं व्यवस्थापयति–**यतो विने**त्यादि। **शक्यत्वासम्भवादि**ति। शक्तेरवच्छिन्नत्वनियमात्। निर्विकल्पकोपस्थिते तद्ग्रहासम्भवाच्चेति भावः[444]। गोत्वत्वादिकमेव तथास्त्वत आह–**गोत्वत्वादी**ति। गवेतरासमवेतत्वादिघटितस्यातिगौरवात्[445]। एवमपि विशेषणतया गोत्वविशिष्टे शक्तेरेवापरीहाराच्चेति[446] भावः। **विशिष्टान्तराणां** किञ्चिद्विशिष्टविशेषणकानां यथाकाशपदे शब्दवतः महदादिपदे च[447] महत्त्वादिमतः शक्यत्वे लाघवाच्छब्दस्य महत्त्वादेश्च[448] शक्यत्वापत्तिरिति भावः[449]। **केवले** इति। विशेषणतानापन्न[450] इत्यर्थः। महदादिपदस्य केवलमहत्त्वादौ स्वारसिकप्रयोगाभावात् तत्र यदि[451] विशिष्टं[452] शक्यमिति तदा[453] केवलकृतावप्यप्रयोगात्[454] तत्रापि कृतिविशिष्टे शक्तिरिति भावः। **स्वारसिके**ति। तेनाधुनिकलक्षणया[455] प्रयोगेऽपि न क्षतिः॥

१२. **एवंचे**त्यारभ्य **केचिदि**त्यन्तमेकं मतम्। फलस्य कृदात्मनेपदलभ्यत्वव्यवस्थापने[456]। **व्यापारविशेषो** गमनत्वादिविशिष्टः। **द्वितीयादेरि**ति। स्वत्वादाविव स्वारसिकप्रयोगात् षष्ठ्या अपि कर्मत्वमर्थः। स च शक्त्या निरूढलक्षणया वेत्यन्यदेतत्। फले द्वितीयाद्यर्थैकदेशे तज्जनकत्वं तु धात्वर्थ एवाश्रयतयाऽन्वेति। इत्थं च समानवित्तिवेद्यतया धात्वर्थजन्यत्वस्यापि फले लाभात् परसमवेतधात्वर्थजन्यफलशालित्वरूपं कर्मत्वं कर्तृप्रत्ययस्थले लब्धं भवतीति भावः। **फलमात्रं वे**ति[457]। तथाच शक्यतावच्छेदके न गौरवम्[458], न वैकदेशान्वयः इति भावः[459]। **अलाभादि**ति। **फलविशेषे**त्यादौ हेतुः, **इतरथा** शुद्धव्यापारस्यैव[460] धात्वर्थत्वे[461]। **पर्यायते**ति। त्यजतीत्युक्ते यादृशार्थबोधो[462] गच्छतीत्युक्ते तद्विलक्षणार्थबोधस्यानुभविकत्वात्[463]। तच्चोभयोः शुद्धस्पन्दार्थकत्वे नोपपद्यते इति संयोगावच्छिन्नस्पन्दे गमेर्विभागावच्छिन्नस्पन्दे च त्यजेः शक्तिः। एवमन्यत्रापि इति भावः॥

१३. गूढाभिसन्धिः[464] शङ्कते–**तवापी**ति। फलविशेषावच्छिन्नव्यापारस्यैव[465] धात्वर्थत्ववादिनोऽपीत्यर्थः। ग्रामं गच्छतीत्यादौ तु[466] धात्वर्थतावच्छेदकसंयोगादौ द्वितीयार्थवृत्तित्वान्वयेन तथान्वयबोधसम्भवात्[467] तन्नोक्तम्। **संयोगादी**त्यादिना। त्यज्यत इत्यादौ[468] विभागादिपरिग्रहः[469]। स्पन्दविशेषणतया धातुशक्यस्य

संयोगादेर्विशेष्यतया[470] बोधासम्भवात् कर्मप्रत्ययस्य फलसामान्यबोधकत्वादिति भावः। यदि च[471] कर्माख्यातादेरेव संयोगत्वादिरूपेण शक्तिस्तदा ममापि द्वितीयादेः संयोगत्वादिना रूपेण शक्तिरित्यभिसन्धिः। **तदवच्छिन्ने**ति। संयोगाद्यवछिन्नेत्यर्थः। सामान्यशक्तस्य विशेषबोधकसमभिव्याहारेण विशेष-बोधकत्वमित्यत्र दृष्टान्तमाह—**यथे**ति। **स्वर्गजनकत्वं**[472] **प्रतीयत** इति पूर्वेणान्वयः। **अन्यदेतद्**िति। यदीष्टतारूपेणैव[473] स्वर्गरूपेष्टबोधकत्वं तदा तत्रापि[474] फलतारूपेणैव[475] संयोगादिबोधकत्वम्[476]। यदि च तत्र व्युत्पत्त्यन्तराश्रयणेन[477] इष्टस्वर्गयोरभेदान्वयबोधेन वा स्वर्गरूपेष्टसाधनत्व-बोधकत्वं तदा ममापि धात्वर्थतावच्छेदकसंयोगादिकम् अस्याभेदान्वयात् व्युत्पत्त्यन्तराश्रयणात्[478] वा[479] संयोगादिरूपफलबोधकत्वमिति[480] भावः।।

१४. ननु फलत्वेन फलस्य[481] शक्त्या संयोगत्वादिरूपेण बोधजनकत्वं व्युत्पत्ति-सहस्रेणाप्यशक्यं तेन रूपेण पदादनुपस्थितेः। नापि धात्वर्थतावच्छेदकसंयोगस्य फलेऽभेदान्वयधीः, इतरविशेषणतया उपस्थितस्य संयोगस्य फलादौ विशेषणतया[482] अन्वयासम्भवात्। स्वर्गजनकत्वादिना[483] स्वर्गजनकत्वधीस्ताद्रूप्येण शक्तौ सामान्यशक्तौ तु[484] स्वर्गजनकत्वादिबोधो[485] मानस एव इत्यत आह-**अस्तु वे**ति। यथा तदादिपदं बुद्धिप्रकारवति शक्तमित्याकारकशक्तिग्रहेऽपि[486] यदा[487] घटत्वादिरूपेण वक्तृबुद्धिप्रकारवत्ता गृह्यते तदा तेन रूपेण[488] बोधकत्वम्[489], तथात्मनेपदं कर्मकृत्पदं वा प्रकृत्यर्थतावच्छेदकवति फले[490] तच्छालिनि वा शक्तमित्याकारकशक्तिग्रहेऽपि[491] संयोगत्वादिरूपेण प्रकृत्यर्थतावच्छेदकत्वग्रहे आख्यातादेरेव[492] संयोगत्वादिना[493] बोधकत्वमित्यर्थः। **फलतच्छालिनी**त्याख्यातकृतोर्यथासंख्यमन्वयः। न च घटत्वांशे अन्याप्रकारकघटत्वप्रकारकशाब्दे तादृशशक्तिग्रहस्याहेतुत्वात्[494] कथमेवमिति वाच्यम्, तादृशशाब्दे तादृशपदार्थोपस्थितेर्हेतुत्वस्यावश्यकत्वे शक्तिज्ञानस्य उक्तरूपेण हेतुत्वे मानाभावात्। प्रकृते च[495] बुद्धिप्रकारवति[496]। शक्तमित्याकारेण गृहीतशक्तिकपदज्ञानस्यापि घटोऽस्य बुद्धिप्रकारवानितिज्ञानसहकारेण घटत्वांशेऽन्याप्रकारकघटत्वप्रकारकबोधजनकत्वसम्भवात्[497]। अतएव मनस्त्वांशेऽन्याप्रकारकमनस्त्वप्रकारकबुद्धिस्थत्वज्ञानासम्भवात् तत्पदादितो न तादृशमनस्त्वप्रकारकधीरिति।।

Bhāṣāpariccheda. Ascribed to Viśvanātha Siddhāntapañcānana. With *Bhāṣāparicchedamuktāvalī*. Ed. Dr. Anamika Roy Chowdhury. Distributor: Sanskrit Pustak Bhandar, Kolkata, 2004.

Bhattacharya, B. : *A Study in Language and Meaning*, Calcutta, 1962.

Bhattacharya, Dinesh Chandra: *Vaṅge Navya-nyāya Carcā*. Bangiya Sahitya Parishat, Kolkata, 1952.

Chatterjee, K. N.: *Word and its Meaning*. Chowkhambha Orientalia, Varanasi, 1979.

Mazumdar, Pradip Kumar: *The Philosophy of Language*. Sanskrit Pustak Bhandar, Calcutta, 1977.

Pandeya, R.C.: *The Problem of Meaning in Indian Philosophy*. Motilal Banarsidass, Delhi, 1963.

Potter, Karl: *The Encyclopedia of Indian Philosophies*. Vol. VI (Indian Philosophical Analysis. Nyāya-Vaiśeṣika from Gaṅgeśa to Raghunātha Śiromaṇi). Motilal Bararsidass, Delhi, 1993

Raja, K. Kunjunni: *Indian Theories of Meaning*. The Adyar Library and Research Centre. Adyar, Madras 20, 1977.

Shastri, Gaurinath: *The Philosophy of Word and Meaning*. Calcutta Sanskrit College Research Series No.5, 1959.

Tattvacintāmaṇi of Gaṅgeśa Upādhyāya. Vol IV, Part 2 (containing Śabda section). With explanatory notes on *Ākhyāta* and Nañ-samāsa by Raghunātha Śiromaṇi. Ed. Pt. Kamakhyanatha Tarkavagisa. Oriental Book Centre, Delhi, 1990.

Part II

Nañvāda of Raghunātha Śiromaṇi

with

NAÑVĀDAṬIPPANĪ

of

BHAVĀNANDA SIDDHĀNTAVĀGĪŚA

Critically edited by

Sanjit Kumar Sadhukhan

Contents

	Introduction	v
1.	रघुनाथशिरोमणिकृतः नञ्वादः	1
2.	भवानन्दसिद्धान्तवागीशकृता नञ्वादटिप्पनी	7
3.	List of authorities and quotations in the text and the commentary	31
	Bibliography	33

NIMM

Introduction

The meaning of the negative particles had long been a topic of discussion in Indian philosophy. The Vaiyākaraṇas, Mīmāśakas and the Naiyāyikas and sometimes others have contributed so much to the topic that it led Raghunātha to compose a separate treatise entitled *Nañvāda.* The negative particle *nañ* here stands for *na* and *mā* used separately in a sentence and *na, a* and *an* in compound words. But sometimes the words meaning difference (i.e. mutual absence) or the like also come under the purview of *nañ.* But what does the *nañ* mean in different types of sentences or words? The Vaiyākaraṇas are found to have examined in detail, the meaning of *nañ* occurring in the Pāṇini sūtras to match the case with the meaning of the sūtras. (Cf. *anaci ca* 8.4.47, *nañ* 2.2.6, etc.). In the topic of Nañ-tatpuruṣa, the meaning of *nañ* is a very important matter of discussion. Apart from this, the Vaiyākaraṇas have also contributed to the topic separately in later independent works. We may mention, by way of example, at least two great grammatico-philosophical works: *Vaiyākaraṇabhūṣaṇasāra* of Kauṇḍa Bhaṭṭa and *Paramalaghumaiijuṣā* of Nāgeśa Bhaṭṭa. The meaning of *nañ* in the word *abrāhmaṇa* is of much interest to the Vaiyākarasṇas. Anyway, they hold two kinds of *nañ:* (i) Paryudasa and (ii) Prasajyapratiṣedha. The first one is affirmation through negation and the second one is negation absolute. The well-known verses in this regard are as follows:

प्रधानत्वंविधेर्यत्रप्रतिषेधेऽप्रधानता।
पर्युदासः सविज्ञेयोयत्रेतरपदेननञ्॥
अप्रधान्यंविधेय त्रप्रतिषेधेप्रधानता।
प्रसज्यप्रतिषेधोऽसौक्रिययायत्रनञ्॥

Simultaneously the Vaiyākaraṇas also refer to a verse where the six meanings of *nañ* have been enumerated:

तत्सादृश्यमभावश्चतदन्यत्वंतदल्पता।
अप्राशस्त्यंविरोधश्चनअर्थाषद्प्रमीर्तिता:॥

The Mīmāṣakas also are found to have been very much concerned to find out the meaning of *nañ* as they have had to explain

numerous Vedic ritualistic injunctions. In particular, the Prābhākara Mimpsakas are the pioneers in this field.

The Naiyāyikas also became a participant in this contentious debate. In the fifth chapter of the *Nyāyamañjarī* of Jayanta Bhaṭṭa there is the discussion on the meaning of nañ, *vis-a-vis* the conflicting views thereon. In the Samāsavāda of the *Tattvacintāmaṇi* of Gangeśa, *nañ* has been discussed.

Raghunātha has discussed the topic in a separate treatise, *Nañvāda.* Though in volume it appears a small work, it is not small at all in the quality and importance of its content. It surveys a wide range of discussions on the topic and the incorporation of the same within the space of such a small work has been made possible by his wonderful power to convey a lot in a terse manner, with utmost economy in words. According to the Naiyāyikas, absence is four-fold, prior absence *(prāgabhāva),* posterior absence *(pradhvalsābhāva),* absolute absence *(atyantābhāva)* and mutual absence *(anmyābhāva).* The first three are called relational absence *(samsrgābhāva).* Of these four varieties of absence, the first two do not come under the purview of linguistic consideration. The other two, viz. mutual absence and absolute absence, have a linguistic basis, and they can be expressed only with the help of the negative particle *na.* (Cf. *Negative Words,* p. 35).

At the very beginning of the discussion, Raghunātha declares that the denotative meaning of *nañ* is two types of absence, Relational absence and Mutual absence. And those, being true to the meaning of *nañ,* will have the counterpositiveness *(pratiyogitā),* which must in turn be 'limited by the property of that which is syntactically connected to absence by the relation of counterpositiveness' *(anvayitāvacchedakāvacchinna).* This conclusion is attested by our verbal knowledge. Let us take an example for illustration: *bhūtale na ghaṭaḥ* (There is no pot on the ground). Here the *neñ* denotes relational absence. Absence is always determined with reference to some positive entity. So in *na ghaṭaḥ,* the absence is with reference to *ghaṭa.* This *ghaṭa* is the counterpostive *(pratiyogin)* of absence. The property of being counterpositive is counterpositiveness *(pratiyogitā).* The *nañ* in *na ghaṭaḥ,* cannot simply denote an absence 'having counterpositiveness,' but that counterpositiveness must be limited by some property. And in the present case that counterpositiveness must be limited by the property of that *(ghaṭa)* which is syntactically connected to absence. So *nañ* denotes an absence having (i.e. reflecting) counter-

positiveness which is limited by the property of that which is syntactically connected to absence. Here *ghaṭatva* is the desired property. If the expression would be *bhūtale na nīlaḥ ghaṭaḥ* then the absence, i.e. the meaning of *nañ* would mean absence whose counterpositiveness is limited by the property of that which is syntactically connected to absence. Here not simply *ghaṭa,* but *nīla ghaṭa,* is syntactically connected to absence. Therefore the property called *anvayitā* will be *nṣlaghaṭatva* and not *ghaṭatva.* Raghunātha establishes his view by citing the example of our verbal usages in the cases of two types of absence: We do not say *nīlaghaṛṭavati na ghaṭaḥ* (There is no pot in a place where there is a blue pot); rather we say, *nīlaghṭavati na pītaḥ ghaṭaḥ* (There is no yellow pot in a place where there is a blue pot). It indeed is the case of relational absence. On the strength of this verbal usage, we affirm that the absence must reflect the counterpositiveness limited by the property of that which is syntactically connected to absence by the relation of counterpositiveness. Here *pīta ghaṭa* (i.e. yellow pot) is connected to absence. So the property of that, i.e. *pītaghaṭwtva* will be the limiting factor of that counterpositiveness of that absence. After this, the case of mutual absence is demonstrated. We never say *nīaḥ ghaṭaḥ na ghaṭaḥ,* rather we say *nṣlaḥ ghaṭaḥ na pītaḥ ghaṭaḥ.* On the strength of this verbal usage, we affirm that in the case of mutual absence also *nañ* denotes the absence which reflects the counterpositiveness limited by the property *(pītaghaṭatva)* of that which is syntactictically connected to absence.

Now Raghunātha proceeds to explain the meaning of *nzñ* used with a verb and with a word with sixth case-ending. In course of discussion, he criticises the Vaiyākaraṇa view according to which the meaning of sixth case-ending is possessorship *(svāmitva)* etc. belonging to a person meant by the word with the sixth case-ending. According to the Naiyāyikas, the meaning of the sixth case-ending is the property of being-possessed *(svatva)* etc.

In the second section, Raghunātha mentions the views of two different schools of philosophers on the moot point at issue. One is referred to by *kecit* and the other by *kaścit.* These philosophers could not be identified, as Bhavānanda did not say anything on it. Anyway, according to the first, in a negative sentence *nañ* denotes the absence of the qualifier *(viśeṣaṇa)* in a qualificand *(viśeṣya),* but according to the other, absence denoted by *naā* is connected to the meaning of the seventh case-ending, and then this absence is connected to the counterpositive as a qualifier. For example, *bhūtale*

na gha: According to former philosophers, the verval knowledge will be 'the absence of occurrence-on-ground in the pot. And according to the latter, the pot *(pratiyogin)* is possessed with the absence of occurrence-on-ground. Raghunātha obviously is against these two views, but he did not put across his opinion very explicitly. Bhavānanda, however, in his commentary, has given the exposition as to the contention of the author.

In the third section, Raghunātha explains the cases in which *nañ* denotes mutual absence. When in a case there is no knowledge of *nañ* and the two entities are connected by the relation of identity, then if in that case *nañ* is added, the mutual absence is known by that *nañ*.

In the fourth section, Raghunātha criticises the view of the Smārtas (i.e. the Mimāmsakas). The Smārta view is explained with reference to a sentence: *yajatiṣu ye yajāmaham karoti nānuyajeṣu* (In sacrifices, one utters the *mantra 'ye yajāmaham,'* but not in an *Anuyāja* sacrifice). It is a single sentence. If we determine the meaning as conveying that the *nañ* here negates the action, then it will allow the option of action. That is, when the utterance of *mantra* is prohibited, it means that there is the chance of prescription to utter the *mantra*. And this prescription is granted by *yajatiṣu ye yajāmaham karoti*. So in a single matter *(anuyāja)*, there are the options, prescription and prohibition. But such a dichotomy is inconsistent. So to avoid it, *nañ* in *nānuyajeṣu* involves a mutual absence. But this view is untenable according to Raghunātha. It is a common experience that when some particular is prohibited, the general prescription will proceed to all setting aside that particular. There is a well-known example also. *Bhrāhmaṇebhyaḥ dadhi dātavyam kauṇḍbnyāya na* (Yogurt should be given to brāhmaṇas, but not to Kauṇḍinya). It means yogurt should be given to all brāhmaṇas excepting Kauṇḍinya. Where is the question of option of giving or not-giving yogurt to Kauṇḍinya? Then there is the discussion on the *nañ* in a sentence like *rātrau śrāddham na kurvīta*. Important here is the view of Raghunātha that the prohibition must not always presuppose the occurrence. With characteristically effective sarcasm, he poses the rhetorical question: should the verbal knowledge 'there is no fire in a lake' lead us to expect a fire to occur on a lake! If the opponents say that—if there is no chance of occurrence of fire on the lake then the prohibition is futile, they are to be answered: the reason for offering the prohibition is because of the possibility of misunderstanding and nothing else. If two

conflicting scriptural statements involve a single object, only then there comes the question of option. For example, the conflicting statements that one is to use a certain kind of cup called ṣoḍaśī in certain kind of ceremony (called *Atirātra* sacrifice), and that one is not to use that particular kind of cup in that ceremony. Given the validity of the logic, the Prābhākaras explain the prohibitory injunction in the similar way. There is a Vedic injunction: *na kalañjam bhakṣtyet* (one must not eat *kalañja). Kalanja* is the meat of a bird or animal killed by a poisoned arrow. The *liṅ* suffix *yat* denotes action *(kārya)*. The *kalañja-eating* is connected to the meaning of *nañ*-absence, and then this absence is connected to the meaning of *liṅ*-action. And then again, the power *(apūrva)* to be generated by prohibition is to be connected as object *(viṣayatvena)*. Therefore, in view of some result (as the Vedic injunctions cannot be futile), one has to guess this distinct type of verbal knowledge. Action should be done in respect of absence of *kalañja-eating.*

In the fifth section, Raghunātha narrates the relation between relaters involved. In *bhūtale na ghaṭaḥ* (There is no pot on the ground), the relation between the pot and its absence is counterpositive-locus relation *(pratiyogi-anuyogi-bhāva)*, and the relation between the 'absence of the pot' and the ground is locus-located relation *(ādhāra-ādheya-bhāva)*. But in *bhūtalam na ghaṃaḥ,* (the ground is not the pot), the relation between the 'absence of the pot' and the ground cannot be *ādhāra-ādheya-bhāva,* as here with the word *bhūtala* there is no sixth or seventh case-ending, and furthermore there appears no knowledge of *ādhāra* as object-attribute *(prakāra)* in the knowledge. Had the hearer heard the sixth or seventh case-ending, then only he could have known the *ādhāra* as object-attribute. Again no type of relation (conjunction etc.) between the ground and the pot can be known there, since the meaning of the two words *(nāma)* are different with the same case-ending in two words, and direct relation between them is not comprehended. But in regard to *nipāta* like *iva, eva* etc. the case is different. Even if there is the same case-ending with the two words, the knowledge of *pratiyogin* and *anuyogin* do appear. As for example, *candraḥ iva mukham* (the face is like the moon). Here *iva* means similarity. *Candra* is counterpositive, and *mukha* is the locus. So they are related. Therefore, except in the case of *nipāta,* where there is the knowledge of relation of separate entities appearing from words, the fundamental prompter *(tantra)* of that knowledge is the presence of meaning of case-endings, being object attribute in the

knowledge. So in the case where there is the connection with the meaning of *iva* etc. there is no dependence on sixth case-ending or its like. In the case of *aghaṭam bhūtalam* or *asamaḥ deśaḥ* etc., in view of identical locushood *(sāmānādhikaraṇya)* in a compound, *nañ* obviously means absence.

In the sixth section, Raghunātha mentions the view of a group of philosophers. Bhavānanda comments that these philosophers did not admit the exclusion of *nipāta* in the case wherein the occurrence of the meaning of case-ending as an object-attribute in the knowledge of syntactical connection of differences between the meanings of two words is needed. But he does not say any more about their explanation on *pratiyogitā* and *anuyogitā* in a sentence with the *nipātaṛiva, eva* etc. Anyway, in *ghaṭasya abhāvaḥ the* sixth case-ending used with the counterpositive word *ghaṭa* means locushood *(anuyogitva)*. There the *ghaṭa* is connected as conditioned *(nirūpita)* and *abhāva* is connected as locus *(adhikaraṇa)*. The meaning of the sixth case-ending is neither counterpositiveness, and nor the *ghaṭa* is connected as located, nor *abhāva* as conditioner. *Nañ* cannot have the strength to produce the knowledge of mutual absence of the meaning of the case-ending, or to produce the knowledge of relational absence in the case where the word denoting *pratiyogin* has the same case-ending as the *anuyogin* word. For example, let us take the first one: *na pacati na rājñaḥ*. Here the *nañ* cannot denote the mutual absence of the meanings of *tip* and sixth case-ending. The example for the next one: *būalam na ghaṭraḥ*. Since the word *ghaṭa* has the same case ending as with the word *bhūtala,* the *nañ* has no strength to denote the relational absence of *ghaṭa* on *bhūtala*. Raghunatha apparently accepts the views of these philosophers as he has not criticised them.

Commentaries on the *Naāvāda*

Nañvāda has been commented upon by a humber of Naiyāyikas. A list of the commentaries is given below:

1. *Nañvādaīkā* by Sārvabhauma Bhaṭṭācārya (Rāmabhadra Sārvabhauma). Ms available in the Asiatic society (Ms no. III. G. 148).
2. *Nañvādaṭippana* by Kūsadāsa Sārvabhauma. Ms available at the repository of Raghunathji Temple of Jammu. (Stein's Cat. p. 147).
3. *Nañvādṭīkā* by Viśvanātha Siddhāntapañcānana. Ms available at Pune (Ms no. 117 of A. 1879–80).
4. *Nañvādaṭippanī* by Bhavānanda Siddhāntavāgīśa. Edited

presently. Partly printed.

5. *Nañvādaṭīkā* by Rudra Nyāyavācaspati. Appears to be lost. (Vide *Vange Navyanyāy Carcā,* p. 274).
6. *Nañvādādīdhitiraudrī* by Rudra Tarkavāgīśa. Appears to be lost. (Vide *Vange Navyanyāy Carcā,* p. 145).
7. *Nañvādaṭīkā* by Raghudeva Nyayālaṇkāra. Ms available at Tanjore. (Vide Tanjore Cat. P. 4568). Ms available also at the Asiatic Society (Ms no. 7832).
8. *Nañvādaṭippanī* by Rāmacandra Tarkavāgīśa. Ms available in the Sanskrit Sahitya Parish at. Ms nos. 3525, 3609, 8272, 12006.
9. *Nañvādaṭīkā* by Jagadguru Rāmakṛṣṇa Bhaṭṭācārya Cakravartin. Ms available in Ulwar Palace library. (Vide Peterson: Ulwar Cat. pp. 29+55).
10. *Nañvādavyākhyā* by Gadādhara Bhaṭṭācārya. Printed in the *Tattvacintāmaṇi,* vol. IV, Part 2 under the editorship of MM Kamakhyanath Tarkavāgisa. Oriental Book Centre, Delhi, 1990
11. *Nañvādaviveka* by Jagannātha, son of Vidyānidhi. Two copies of this treatise were available at the Raghunathji Temple of Jammu. (Stein's Cat. p. 147). It appears to be a commentary on the *Nañvāda* of Raghunātha Śiromaṇi.
12. *Naṇvādavyākhyā* by Jagadguru Jayarāma Nyāyapañcānana. (Vide *Vange Navyanyay Carcā,* p. 280)
13. Ingalls reports a *Vyākhyā* by Mathurānātha Tarkavāgīśa on Raghunātha's *Nañvāda.* (Vide *Encyclopaedia of Indian Philosophies,* vol. 1).
14. A commentary by Rāmanātha. (Vide *Encyclopaedia of Indian Philosophies,* vol. I).
15. *Viveka* by Paṭṭābhirāma. (Vide *Encyclopaedia of Indian Philosophies,* vol. I).

Printed edition and the manuscripts utilized to prepare the edition of the *Nañvāda*

A: *Nañvāda:* Printed in the Appendix in the *Tattvacintāmaṇi,* vol. IV, Part 2 (pp. 1010–86). Oriental Book Centre, Delhi, Reprint, 1990.

B: *Nañvāda* manuscript no. 8737, preserved in the manuscript library of Sanskrit Sahitya Parishat, Kolkata. Partly damaged at the left end. Running title : (नञ्वाद शि Square-shaped space is left blank at the centre but no perforation is there.
No. of folios: 3

Lines per page: 4
Letters/line: 55 approx.
Size: 39 x *6Y2* cm
Script: Bengali

C: *Nañvāda* manqscript no 8193, preserved in the manuscript library of Sanskrit Sahitya Parishat, Kolkata. Square-shaped space is left blank at the centre with actual perforation. The text of *Nañvāda* is followed by पदार्थतत्व of Raghunat the centre but no performation is there.

No. of folios : 3
Lines per page: 4
Lettes/line : 55 approx
size : 39 61/2 cm
Script : Bengali

C: *Nañvāda* manuscript no 8193, preserved in the manuscript lubrary of Sanskrit Sahitya Parishat, Kolkata, Square-shaped space is lift blank at the centre with actual perforation. The text of *Nañvāda* is followed by of Raghunātha.

No. of folios: 3 (lbl-3bl)
Lines per page: 5-6
Letters/line: 80 approx.
Size: x *6Y2* cm
Script: Bengali

Printed edition and the manuscripts utilised to prepare the edition of the *Nañvādamippanī*

P: *Nañvāda* commentary of Bhavānanda. Incomplete text printed in the Appendix in the *Tattvacintāmaṇi,* vol. IV, Part 2 (pp. 1010-1086), Oriental Book Centre, Delhi, Reprint, 1990. There is no mention of the name of the commentator. Sri Dinesh Chandra Bhattacharya in his *Vange Navya-Nyāy Carcā* (p. 135) identified the commentator as Bhavānanda on the basis of the colophon in a manuscript of the Madras library. Anyway the Asiatk society, Kolkata had a com men tary on this *Nañvāda* of Raghunātha Śiromaṇi named *Naāvādārthapradṣpa.* This manuscript also has colophon stating the name of the commentator. But Sri Bhattacharya did not mention this manuscript. Moreover he did not mention the incompleteness of the text in the Printed edition either.

Q: Manuscript (no. 7764) of *Nañvādaṭippanṣ* of Bhavānanda. Preserved in the manuscript library of Sanskrit Sahitya Parishat, Kolkata.Fol no 16al-16b2. Contains *ākhyātavādarṭippanṣ* of

Bhavānanda; then starts the *Nañvādaṭippanī*. Square-shaped space is left blank at the centre with actual perforation.

No. of folios: 11 (l6b2-26b8)
Lines per page: 6–7
Letters/line: 78 approx.
Size: 40x *6Y2* cm
Script: Bengali

R: Manuscript (no. G 5926) of *Nañvādarthapradīlpa* of Bhavānanda. Preserved in the manuscript library of the Asiatic Society. The manuscript has no square-shaped blank space left at the centre. It has a number of scribal errors.

No. of folios: 10
Lines per page: 13–14
Letters/line: 78 approx.
Size: 11 x 5 inch
Script: Devanagari.

रघुनाथशिरोमणिकृतः नञ्वादः

१. संसर्गाभावोऽन्योन्याभावश्च[1] नञोऽर्थः। तत्र चान्वयितावच्छेदकावच्छिन्न-प्रतियोगिताकत्वं[2] व्युत्पत्तिबललभ्यम्, नीलघटवति न घटः, नीलो[3] घटो न घट इत्याद्यव्यवहारात्, इह नीलघटवति[4] न पीतो[5] घटः, नीलो[6] घटो न पीतो[7] घट[8] इत्यादिव्यवहाराच्च[9]। प्रतियोग्यभावान्वयौ च[10] तुल्ययोगक्षेमौ। तेन यत्पदोपस्थाप्यस्य[11] प्रतियोगिनो[12] अनुयोगिन्याधाराधेयभाव-सम्बन्धेनान्वयस्तत्र[13] तत्संसर्गाभावस्यापि[14] तथा, यथा पचति चैत्रः, न पचति चैत्रः, चैत्रस्येदम्, नेदं[15] चैत्रस्य इत्यादौ[16] तिङाद्यर्थस्य कृत्यादेः प्रथमान्तपदोपस्थापित[17] एव तत्र[18] तथेति तदभावस्यापि तथा[19] इति[20]। षष्ठ्यादेश्चैत्रादिनिरूपितं स्वत्वादिकमर्थो[21] न तु तन्निष्ठं[22] स्वामित्वादिकम्[23]। तस्य धनाद्यवृत्तित्वेन चैत्रीयेऽपि धने नेदं चैत्रस्येति प्रसङ्गात् निरूपकत्वादेः सम्बन्धस्य प्रतियोगितानवच्छेदकत्वादित्येषा[24] दिक्। यत्र चाधाराधेयभावो न संसर्गमर्यादया[25] लभ्यस्तत्रानुयोगिपदे[26] सप्तम्यपेक्षा, यथा भूतले घटः, भूतले न घट[27] इति। अत्र च[28] तात्पर्यवशात्[29] कदाचिद्भूतलादौ[30] घटाभावः[31] कदाचिच्च[32] घटादौ भूतलवृत्तित्वाभावः प्रतीयते[33]। अतएव पृथिव्यां गन्धो न जले इत्यादौ प्रतीतेरेकविशेष्यकत्वानुभवः[34]।।

२. <u>केचित्</u> तु सर्वत्र विशेष्ये विशेषणस्याभावो नञा प्रत्याय्यते। अतएव भूतले घटो नास्ति घटौ न स्तः घटा न सन्ति[35] इत्यादौ घटोऽस्तीत्यादाविव वचनैक्यनियम[36] इत्याहुः[37]। तेषां मते[38] जातौ न सत्तेत्यत्र गतिश्चिन्तनीया जातिसमवेतत्वस्याप्रसिद्धत्वात्,[39] सम्बन्धान्तरेण जातिवृत्तित्वस्य सत्तायामपि[40] सत्त्वात्।। सप्तम्यर्थान्विताभावस्य विशेषणतया प्रतियोग्यन्वय इति <u>कश्चित्</u>[41]।।

३. यत्र च[42] विशेषणविशेष्ययोरभेदेनान्वयो[43] व्युत्पन्नस्तत्रान्योन्याभावो नञा[44] बोध्यते, यथायं घटो नीलः, नायं घटो नील इति। अत्र[45] विशेषणविशेष्यपदयोः, समानविभक्तिकत्वं विरुद्धविभक्तिविरहो[46] वा तन्त्रम्। अतएव

"यजतिषु ये यजामहं करोति नानुयाजेषु" [ ]

इत्यादावेकवाक्यतानुरोधात्[47] ये यजामहमित्यादेरनुषङ्गगौरवाच्च यजतीष्वनुयाजभेदो बोध्यते। विशेषणविभक्तिस्तु प्रयोगसाधुत्वाय[48]। नामार्थयोर्भेदेनान्वयबोध[49] एव प्रकारीभूतविभक्त्यर्थोपस्थितेस्तन्त्रत्वात् लाघवेन तयोरन्वयबोधमात्र[50] एव तथात्वम्। विशेषणविभक्तिस्तु अभेदार्थिका। नीलोत्पलं चित्रगुरित्यादौ लुप्ताया[51] विभक्तेरनुसन्धानमिति मते तु न राज्ञ इत्यत्र षष्ठ्यर्थसम्बन्धस्येव[52] अत्रापि सप्तम्यर्थाभेदस्याभावो[53] बोध्यताम्।।

४. यत्तु करणनिषेधे विकल्पापत्तेर्भेदपरतेति, तदसत्। विशेषनिषेधे सामान्यविधेस्तदितरपरताया:[54] "ब्राह्मणेभ्यो दधि दातव्यं कौण्डिन्याय[55] न दातव्यम्" इत्यादौ व्युत्पत्तिसिद्धत्वात्[56] विकल्पानवकाशात्। न च तत्रापि[57] कौण्डिन्यभेदो बोध्य:। कौण्डिन्यपदस्य विरुद्धैकवचनावरुद्धत्वात्[58]। न खलु महतो राज्ञ: न महतो राज्ञ: इत्यत्रेव महतां राज्ञो न महतां राज्ञ इत्यत्रापि राजनि[59] महदभेदभेदौ प्रतीयेते। एको न द्वाविितिवत्[60] कथञ्चित् तत्समर्थनेऽपि[61] द्वितीयस्य दातव्यमित्यस्यानन्वयप्रसङ्गात्। अतएव "रात्रौ श्राद्धं न कुर्वीत" इत्यादौ करणनिषेधेऽपि न विकल्पावकाश:। न हि[62] तत्रापि रात्रीतरपरता। रात्रिभिन्ने श्राद्धविधावपि "अमावास्यायां[63] पितृभ्यो दद्यात्" इत्यादितो रात्रिश्राद्धप्रसक्तत्वस्य[64] दुर्वारत्वात्। न खलु क्रियारहितं[65] श्राद्धविधायकं वाक्यान्तरमस्ति येनेदं तेन समम्[66] एकवाक्यतामासादयेत्। नापीदं नानुयाजेष्वितिवत् पृथक् क्रियारहितम्। अथ रात्रौ श्राद्धस्य[67] प्रसक्तौ विकल्पापत्तिरप्रसक्तौ निषेधानुपपत्ति:[68], प्रसक्तं हि प्रतिषिध्यत[69] इति चेत्, साधीयानयं मन्त्रपाठो यद्बलात् जलह्रदे दहनो[70] नास्तीत्यादौ शाब्दबोधेऽपि परमयत्नेन[71] तत्र दहनप्रसक्तिरुपादीयते[72]। निषेधवैयर्थ्यमिति[73] चेत्, तात्पर्यानवबोधनिबन्धनरात्रिश्राद्धकरणवारणस्य[74] तदर्थत्वात्। एकविषयतया पुनरनन्यगत्या षोडशिग्रहणाग्रहणयोर्विकल्प[75] इति। अत्र च षोडशिग्रहण[76] नेष्टसाधनमित्यादिकं नार्थस्तत्र[77] ग्रहणविधिविरोधात्, अपि तु षोडशिग्रहणाभाव[78] इष्टसाधनमित्यादिकम्। व्युत्पन्नश्च नञ्समभिव्याहृतधात्वर्थस्याभावेऽपि विभक्त्यर्थान्वय:।। अतएव[79] प्राभाकरा:–

न कलञ्जं भक्षयेत् इत्यादिश्रुते:[80] कलञ्जभक्षणाभावविषयकं कार्यमित्यर्थमाहु:[81]। नियमस्तु[82] तात्पर्यादिवशात् मुख्यफलाजनकत्वेऽपि अङ्गस्य[83] परमापूर्वरूपोपकारसाधनत्वम्[84] अविरुद्धम्। ग्रहणविध्यन्यथानुपपत्त्या षोडशिग्रहणादतिशयितं[85] परमापूर्वम्। तस्माच्चातिशयितं मुख्यं फलं[86] कल्प्यत इति सर्वसमञ्जसम्।

५. प्रतियोग्यभावयो: प्रतियोग्यनुयोगिभावो अभावाधिकरणयोराधाराधेयभावश्च सम्बन्धविधया भासते। निपातातिरिक्तस्थले एव प्रातिपदिकार्थयोर्भेदान्वये[87]

प्रकारीभूतविभक्त्यर्थोपस्थितेस्तन्त्रत्वात्।[88] अतएव इवाद्यर्थान्वये[89] न षष्ठ्याद्यपेक्षा। अघटं भूतलम् असमो देश इत्यादौ समासे सामानाधिकरण्यानुरोधात्[90] नञोऽभाववत्परता।।

६. <u>केचित</u> तु प्रतियोगिपदोत्तरसुप:[91] प्रतियोगित्वे अनुयोगित्वे वा नञुत्तरस्याधिकरणत्वे[92] नञो वा अभाववति[93] लक्षणा विभक्त्यर्थानुयोगिसमान-विभक्तिकार्थयोरन्योन्याभावसंसर्गाभावयोर्बोधने[94] नञो न सामर्थ्यम्।[95] तेन न पचति न राज्ञ इत्यादौ कृतिसम्बन्धादेरन्योन्याभावो[96] भूतलं न घट इत्यादौ घटादे:[97] संसर्गाभावो न प्रतीयत इत्याहु:।। इति।।

।।महामहोपाध्यायश्रीरघुनाथशिरोमणिभट्टाचार्यविरचितं नञ्वादरहस्यं सम्पूर्णम्।।[98]

संदर्भसंकेत:

1. C (1b1) notes a benediction: ओं नमो गणेशाय
2. B (1a1) omits च.
3. A (p. 1033): नील
4. C (1b1): पीत for नील
5. C (1b1) नीलो for पीतो
6. A (p. 1033), C (1c1): पीतो
7. A (p. 1033): नील:, C (1b1): नीलो
8. A (p. 1033) omits the word.
9. B (1a2): इति for इत्यादि
10. B (1a2) omits the word.
11. A (p. 1035), B (1a3), C (1b2) and D (p. 1034): यत्पदोपस्थापितस्य: Changed according to E and F.
12. A (p. 1035) omits the word.
13. B (1a3): ऽ धेयभावान्वयबोधस्तत्र
14. C (1b2) omits तत्.
15. B (1a4): न for नेदं
16. C (1b3): इत्यादि
17. C (1b3) omits पद.
18. A (p. 1036) omits the word.
19. A (p. 1036), B (1a4): तत्र तथा
20. A (p. 1036), C (1b3) omit the word.
21. B (1a5): सत्त्वादि० C (1b3): निरूपितसत्त्वादि०
22. B (1a5): तन्निष्ठ
23. B (2a5), C (1b4): स्वामित्वादि

24. B(1b1): प्रतियोगित्वानव॰
25. C (1b4): सम्बन्धमर्याद
26. B (1b1): omits पदे.
27. A(p. 1039): भूतले घटो न घट for भूतले घट:, भूतले न घट:
B(1b1): भूतले न घट: भूतले घट for भूतले घट:,भूतले न घट:
28. Addedaccording to Q and R manuscripts.
29. B(1b1): तात्पर्यादिवशात्
30. C (1b5) omits कदाचित्.
31. C (1b5): घटाद्यभाव:
32. A(p. 1041), C (1b5) omit च.
33. C (1b5): भासते
34. B(1b3) omits प्रतीते:.
35. C (2a1): न सन्ति घटा for घटा न सन्ति
36. C (2a1) ॰ नियमा
37. A(p. 1046): इत्यप्याहु:
C (2a1): इति प्राज्ञ: (?इति प्राहु:)
38. A(p. 1046),B(1b4) omit the word.
39. A(p. 1046): प्रसिद्धे: for प्रसिद्धत्वात्
40. B(1b4), C (2a2) omit अपि.
41. C (2a2): केचित्
42. B(1b4) omits च
43. B(1b4): ॰ भेदान्वयो
44. B(1b4) reads नञा before अन्योन्याभावो.
45. A(p. 1049),B(2a1): तत्र
C (2a3): तत्र च
46. A (p. 1050),B(2a1): राहित्यं for विरहो
47. C (2a4): व्याक्यानुरोधात्
48. A(p. 1052): योगसाधु:
C (2a4): प्रयोगसाधु:
49. C (2a4) omits बोध॰
50. B(2a3) omits मात्र॰
51. C (2a5): लुप्ताया एव
52. C (2a5): षष्ठ्यर्थस्य सम्बन्ध॰
53. C (2a5): सप्तम्यर्थस्याभे॰
54. C (2a6): ॰ परत्वस्य
55. B(2a5): तक्रकौण्डिन्याय
56. C (2a6): सिद्धत्वेन
57. C (2a6): omits अपि.
58. C (2b1): ॰ वचनविरुद्धत्वात्
59. B(2b1) omits अपि राजनि॰
60. A(p. 1061): द्वावित्येत्रेव
61. C (2b1) omits तत्॰

62. B(2b2): च
63. B(2b2): अमावस्यायां
64. B(2b2): ० प्रसक्तस्य
C (2b2): रात्रौ श्राद्धप्रसक्ते
65. C (2b3) क्रियारहितमपि
66. B(2b3): सहितं
67. C (2b3): श्राद्ध
68. A(p. 1067): कर्थनिषेध:
B(2b4): निषेध: एवानुपपन्न:
69. C (2b5) omits प्रसक्तं हि प्रतिषिध्यत.
70. C (2b4): वह्नि:
71. A(p. 1069): परमप्रयत्नेन
C (2b4): परयत्नेन
72. C (2b3) omits दहन०
73. A(p. 1069): निषेधविधिवैयर्थ्यमिति
74. C (2b5) omits रात्रि
75. C (2b5) ग्रहणविकल्प
76. C (2b5) षोडशीग्रहणं
77. A(p. 1072): ० त्यादिकमर्थो for ० त्यादिकंनार्थस्तत्र
B(2b6): ० त्यादिकंनार्थो
78. C (2b5): षोडशीग्रहणा०
79. A(p. 1073): अत्र
80. C (3a1): इति for इत्यादि
81. A(p. 1074): ०कार्यमित्यर्थइत्याहु:
C (3a1): कार्यमर्थमाहु:
82. A(p. 1074), B(3a1): नियमतस्तु
83. C (3a1): चाङ्गस्य
84. B(3a, C (3a2): परमापूर्वरूपेष्टसाधनत्वम्
85. C (3a2): च षोडशीग्रहणा० · · · ०शयति (शयिर्त)
86. C (3a2): फलमिति
87. A(p. 1081): देनान्वये.
88. A(p. 1081),B(3a4): ० विभक्त्युपस्थिते०
89. C (3a4): इवार्थान्वये
90. A(p. 1082)B(3a5): ० करण्याद्यरोधात्
91. B(3a5): ० सुपश्च
92. A(p. 1084): ० करणत्वन
93. B(3a6) वाभवति for वा अभाववति
B(3a6) omits वा.
94. A(p. 1084): ० विभक्तिकस्यैवान्योन्या.
B(3a6): ० विभक्तिकयोरन्योन्या.
C (3a5): ० भावबोधने.
95. A(p. 1084): नञोऽसामर्थ्यम् for नञो न सामर्थ्यम्

96. A,B, C कृत्यादे But changed to कृतिसम्बन्धादेः according to the commentary.

97. B(3b1): घट

C (3b1): घटादेश्च

98. B(3b1): इति भट्टाचार्यशिरोमणिविरचितंनञ्वादरहस्यंसमाप्तम्।

C (3b1): इति नञ्वादः समाप्तः।

NMM

भवानन्दसिद्धान्तवागीशकृता नञ्वादटिप्पनी

१. **संसर्गाभाव** इति।[1] शक्यतावच्छेदकभेदेन शक्तिभेदस्य सूचनाय[2] उक्तिभेदः। तथाच संसर्गाभावत्वम् अन्योन्याभावत्वं[3] च नञः शक्यतावच्छेदकमित्यर्थः[4]। न च लाघवात् सर्वसाधारणमभावत्वमेव शक्यतावच्छेदकमस्तु तत्तत्समभिव्याहारबलात्[5] समवायाद्यवच्छिन्नायास्तादात्म्यावच्छिन्नायाश्च[6] प्रतियोगितायाः[7] संसर्गतया भानादेव[8] बोधवैलक्षण्यमिति[9] वाच्यम्। घटो नास्तीत्यादौ संसर्गाभावत्वस्यैव[10] घटः पटो[11] न इत्यत्र भेदत्वस्यैव प्रकारतया[12] आनुभविकत्वेन तथाभिधानात्[13]। संसर्गाभावत्वं च ध्वंसप्रागभावयोरप्यनुभवबलाद् अनुगत-प्रतिबध्यप्रतिबन्धकभावबलाच्च सिद्धम्। भवति ह्यत्यन्ताभावस्येव[14] ध्वंसप्रागभावयोरपि बुद्धौ नियमतः तत्कालावच्छेदेन तद्देशे प्रतियोगिमत्ताधीप्रतिबन्धः, तत्र[15] समवायादिना तद्घटवत्ताबुद्धिं प्रति तद्घटत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावप्रागभावादिबुद्धित्वादिना[16] प्रतिबन्धकत्वद्वयकल्पने[17] गौरवात्। लाघवात्[18] समवायेन तद्घटत्वावच्छिन्नप्रतियोगिताकाभावबुद्धित्वमेव प्रतिबन्धकतावच्छेदकं[19] कल्प्यते, तच्च ध्वंसप्रागभावयोः समवायाद्यवच्छिन्नप्रतियोगिताकत्वेनैव[20] निर्वहतीति[21] <u>प्राचीनाः</u>।

<u>नवीनास्तु</u>[22]–संसर्गाभावत्वं न संसर्गारोपजन्यप्रतीतिविषयाभावत्वं[23] संसर्गावच्छिन्नप्रतियोगिताकाभावत्वं[24] वा। आरोपस्याभावप्रत्यक्षहेतुतायां[25] मानाभावात्, अतीन्द्रियाभावाव्याप्तेः[26] संसर्गत्वावच्छिन्नत्वप्रतियोगित्वाद्यनिरुक्तेः[27] संयोग्यन्योन्याभावातिव्याप्तेश्च[28]। संयोगिता- दात्म्यस्य संयोगरूपतया तस्य फलतः संयोगावच्छिन्नप्रतियोगिताकत्वात् सम्बद्धतया[29] तादात्म्यतया वा[30] वैलक्षण्यस्य अवच्छेदकतया[31] निर्वक्तुमशक्य-त्वात्। एवमन्योन्याभावत्वमपि न तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताका-भावत्वम्[32] उक्तरीत्या संयोगेन संयोग्यत्यन्ताभावेऽतिव्याप्तेः। किन्तु अत्यन्ताभावादौ संसर्गाभाव इत्याकारानुगतप्रतीतिसाक्षिकमखण्डोपाधिरूपमेव[33] तत्। एवमन्योन्याभावत्वमपि तादृशप्रतीतिसिद्धमखण्डोपाधिरूपमेवेति[34] तदेव शक्यतावच्छेदकम्। यदि

च[35] घटो नास्तीत्यादावत्यन्ताभावत्वप्रकारेणैव[36] बोध आनुभविको न तु ध्वंसादिसाधारणसंसर्गाभावत्वेन, ध्वंसादिस्थलेऽपि अत्यन्ताभावमादायैव नास्तीत्यादिधीरबाधिता तदा अत्यन्ताभावत्वम् अन्योन्याभावत्वं च द्वयं[37] शक्यतावच्छेदकमितिप्राहु:[38]।

ननु यत्किञ्चिद्घटवति घटो नास्तीति यत्किञ्चिद्घटे वा घटो नेति धी: घटान्तरस्य संसर्गाभावम् अन्योन्याभावं वा अवलम्ब्य कुतो न स्यादत[39] आह-**तत्रे**ति। **तत्र** संसर्गाभावे अन्योन्याभावे च नञर्थे। **अन्वयिते**ति[40]। प्रतियोगितासम्बन्धेन[41] नञर्थे योऽन्वयी[42] तत्त्वावच्छेदकं[43] तादृगन्वयितावच्छेदकं[44] घटो नास्तीत्यादौ घटत्वादिकं तदवच्छिन्नप्रतियोगिताकत्वमित्यर्थ:। **व्युत्पत्ती**ति। पदान्तरासमभिव्याहृतघटत्वविशिष्टघटवृत्तिमत्पदसमभिव्याहृतनञ्पदजन्यसंसर्गाभावोपस्थितेर्घटत्वावच्छिन्नप्रतियोगितासम्बन्धेनैव घटत्वविशिष्टप्रकारकान्वयबोधजनकत्वस्वाभाव्यं[45] **व्युत्पत्ति:, तद्बललभ्यं**[46] तद्बलात् सिद्धं शाब्दबोधविषय इत्यर्थ:। तने नीलो घटो नास्तीत्यादौ न घटत्वावच्छिन्नाभावधी:, तत्र घटपदस्य नीलपदसमभिव्याहृतत्वात्[47] तदसमभिव्याहृतत्वं च तत्समभिव्याहृतत्वेनाज्ञातत्वम्[48], तेन नीलो घटो नास्तीति प्रत्युक्ते[49] च[50] नील इत्यश्रुत्वा घटो नास्तीति यत्र शाब्दबोध: तत्रापि नानुपपत्ति:। अन्वयितावच्छेदकं च वैज्ञानिकम्। तेन लोहितो वह्निर्नास्तीत्यादौ लोहितवह्नित्वस्याप्रसिद्धावपि न क्षति:। तत्र लौहित्यस्यानुयोगितावच्छेदकतया[51] भावत्वं वह्नित्वे[52] वह्नित्वस्यैवावच्छिन्नत्वे तादृशावच्छिन्नत्वस्य प्रतियोगिताकत्वे तस्य चाभावे सम्बन्ध: संसर्ग:[53] संसर्गविधया[54] भानेऽप्येतादृश:[55] परस्परोपश्लेषोऽनुभवबलात संसर्गविधयैव[56] विषय:। इयांस्तु[57] विशेष:-यत्र तादृशपरस्परोपश्लेष एव सम्बन्धताख्यविषयता पर्याप्ता तत्र तादृशावच्छिन्नत्वादीनां प्रकारता। यत्र च[58] तादृशविशिष्ट एव वैज्ञानिके पारमार्थिके वा सा पर्याप्ता तत्र न तादृशसम्बन्धघटकस्य प्रकारता[59] सा किन्तु सम्बन्धीभूततादृशविशिष्टप्रतियोगिन[60] एवेति। अतएव लोहितस्फटिक[61] इत्यादौ लौहित्यसमवायिप्रतियोगिकसंयोगस्य सम्बन्धत्वेन संयोगांशे[62] लौहित्यसमवायिनोऽपि प्रतियोगित्वस्य संसर्गतया भानेऽपि न लौहित्यसमवायिन: प्रकारतेति ध्येयम्। घटत्वमवच्छिन्नत्वं प्रतियोगिता[63] चेति विशकलितमेव[64] सम्बन्ध:, न तु तेषां परस्परोपश्लेषोऽपीति केचित् तत् तुच्छम्। एतत् त्रितयं यदि घटत्वस्य सम्बन्धस्तदा[65] प्रतियोगितायामपि घटत्वस्य सम्बन्धभाने अनुभवविरोध:। अथ घटस्य सम्बन्धस्तदवच्छिन्नत्वेऽपि[66] घटस्य सम्बन्धभाने[67] घटत्वस्य च तदभाने[68] स एव विरोध:। घटत्वावच्छिन्नप्रतियोगिता अखण्डैवेति केचित्[69]। तदपि न।

लोहितवह्निर्नास्तीत्यादौ[70] तदसम्भवात्। घटो नास्तीत्यादौ[71] घटत्वादेरवच्छेदकत्वभानस्य[72] आनुभविकत्वेन[73] तदनभ्युपगमे अनुभवविरोधात्। अत्र च घटो नास्तीत्यादौ घटः प्रतियोगितया घटत्वं च स्वावच्छिन्नप्रतियोगिताकत्वेन सम्बन्धेनाभावे[74] प्रकारीभूय भासते। घटत्वं च प्रतियोगिविशेषणतापन्नमेवाभावे प्रकारः, न तु स्वातन्त्र्येण, धूमवान् पर्वतो वह्निमान् इत्यादौ पर्वतविशेषणतापन्नधूम[75] इव वह्नौ तेनाभावो घटीयः, घट इत्याकारो नेति नव्याः। अन्ये तु घटत्वावच्छिन्नप्रतियोगिताकत्वं घटस्यैव सम्बन्धः न तु घटत्वस्य इति नोक्तातिप्रसङ्ग इत्याहुः[76]। तादृशव्युत्पत्तौ अन्वयव्यतिरेकौ प्रमाणयति–**नीला घटवती**त्यादिना। यद्युक्तव्युत्पत्तिर्नाभ्युपेयते तदा नीलघटवत्यपि पीतघटसंसर्गाभावस्य नीलघटे[77] पीतघटान्योन्याभावस्य[78] सत्त्वात् घटप्रतियोगिकत्वेन तद्भानमपि नञा क्रियत इत्यर्थः। संसर्गान्योन्याभावभेदेनोभयत्र उदाहरणभेदप्रदर्शनम्[79]। व्यतिरेकमुक्त्वान्वयमाह–**इह**[80] **नीले**त्यादिना। नीलघटवत्यपि क्वचित् पीतघटसत्त्वात् अवच्छेदकावच्छेदेनान्वये बाध[81] इति तद्वारणाय–**इहे**ति। इदं चात्र बोध्यम्[82]–**न पीतो**[83] **घट** इत्यादौ पीतगुणवतोऽभेदसम्बन्धेनानुयोगितावच्छेदक[84]घटत्वम् अन्वयितावच्छेदकं नामार्थयोरभेदस्यैव संसर्गत्वात्। तच्च[85] समवायेन पीतगुणानुयोगितावच्छेदकं घटत्वमपेक्ष्य गुरुतरमतो नावच्छेदकम्, पीतगुणानुयोगितावच्छेदकं च घटत्वं नान्वयिता-वच्छेदकं तथा[86] तत्पदेनाबोधनात्[87]। अतो गुरुधर्मस्यावच्छेदकत्वकल्प एवैतादृशः शाब्दबोधो विशेषदर्शिनामिति। ननु भूतलं न घट इत्यादौ भूतलादौ घटादिसंसर्गाभावधीः स्यात्। न च संसर्गाभावबोधे अनुयोगिनि सप्तम्यपेक्षिता, चैत्रो न पचतीत्यादौ[88] तिङाद्यर्थस्य[89] कृत्यादेः संसर्गाभावबोधो न स्यादत आह–**प्रतियोगी**ति। **तुल्ये**ति। अभावान्वयः प्रतियोग्यन्वयेन तुल्ययोगक्षेमः, तेनानुयोगिनि प्रतियोग्यन्वयस्य यत्र सम्बन्धत्वं तत्र तदभावान्वयस्यापि तथात्वम्। यत्र च प्रतियोग्यन्वयस्य प्रकारत्वं तत्र तदभावान्वयस्यापि प्रकारत्वम्। तथाच उक्तपदोपस्थाप्यस्य[90] प्रतियोगिनोऽनुयोगिना अन्वयबोधे[91] यदपेक्षितं तत्र तदभावान्वयबोधेऽपि[92] तदपेक्षितमित्यर्थः पर्यवस्यति। एतदेव फलमुखेन दर्शयति–**तेने**त्यादिना। **यत्पदोपस्थाप्यस्ये**ति[93]। तथाच पदविशेषजन्यप्रतियोग्युपस्थित्यन्तर्भावेन कार्यकारणभावो बोध्यः। अन्यथा चैत्रो न पाककृतिरित्यत्रापि कृतिसंसर्गाभावधीः स्यादिति भावः। तिङाद्यर्थस्यापि कृत्यादेर्धात्वर्थे जनकत्वेन नञर्थे प्रतियोगित्वेनान्वयादाधारा- धेयभावसम्बन्धेनैवेत्युपपन्नमतः[94] **अनुयोगिनी**ति अधिकरणत्वेनान्वयबोधविषय इत्यर्थः। **तत्संसर्गाभावस्यापि**। तत्पदोपस्थाप्यस्य[95] प्रतियोगिनः संसर्गाभावस्यापि। **तथा** आधारधेयभावसम्बन्धेनैवान्वयः[96]। पचति चैत्र इत्यत्र प्रतियोग्य-

न्वयस्य सम्बन्धत्वं दर्शयित्वा तदभावान्वयस्य तद्दर्शयति–**न पचति चैत्र** इति। वैयाकरणमते कर्तुराख्यातवाच्यत्वात् तस्य च अभेद एव संसर्ग इत्यत: सुब्विभक्तिमुदाहरति–**चैत्रस्येद**मित्यादिना। **तिङादी**ति **आदिना** षष्ठ्या:, **कृत्यादे**रिति **आदिना** स्वत्वस्य च[97] परिग्रह:[98]। **प्रथमान्ते**ति। तथाच विभक्तिजन्यकृत्युपस्थितिजन्यकृतिसंसर्गाभावस्याधाराधेयभावेनान्वयबोधे नञ्पदजन्याभावोपस्थिति: प्रथमान्तपदजन्याधिकरणोपस्थिति:[99] कारणमेवं रीत्या कार्यकारणभावो बोध्य:[100]। एवमुत्तरत्रापि। **तत्र** अनुयोगिनि चैत्रे धने च। **तथा** आधाराधेयभावसम्बन्धेनैवान्वय:[101]। **तदभावस्यापि** कृत्यादिसंसर्गाभावस्यापि। ननु षष्ठ्याद्यर्थ:[102] स्वामित्वं तस्य च धने निरूपकत्वसम्बन्धेनैवान्वयो न त्वाधाराधेयभावसम्बन्धेनेत्यत आह–**षष्ठ्यादे**रिति। षष्ठ्यर्थस्वत्वे[103] प्रकृत्यर्थस्य चैत्रादे: केन सम्बन्धेनान्वय[104] इति तद्दर्शयति–**चैत्रादिनिरूपित**मिति। तथाच निरूपितत्वसम्बन्धेन तत्र प्रकृत्यर्थस्यान्वय इति भाव:। **तन्निष्ठं** चैत्रादिनिष्ठम्। एतेन स्वामित्वस्य षष्ठ्यर्थत्वे प्रकृत्यर्थेन[105] समं तस्यान्वयबोधे निष्ठत्वमेव सम्बन्ध: इत्युक्तम्। **तस्य** चैत्रादिनिष्ठस्वामित्वस्य। **धनाद्यवृत्तित्वेने**ति। तथाच वृत्तितानियामकेन सम्बन्धेन[106] स्वामित्वाभावबोधनेऽबाधित एवेति तथा प्रयोग: स्यादिति भाव:। ननु स्वामित्वस्य षष्ठ्यर्थत्वे[107] तस्य निरूपकत्वसम्बन्धेनैव[108] धनेऽन्वय:। तत्सम्बन्धावच्छिन्नप्रतियोगिताक एव तदभावो नञा प्रत्याय्यते चैत्रीयं तु धनं तन्निरूपकमेवेति[109] कथं तत्र नेदं चैत्रस्येत्यादे: प्रसङ्ग: इत्यत आह–**निरूपकत्वादे**रिति। निरूपकत्वादिसम्बन्धस्य प्रतियोगितावच्छेदकत्वे[110] किं बाधकमत[111] आह–**दिगि**ति। प्रमाणान्तरसिद्धमेवार्थं शब्दो बोधयति न तु शब्दबलादेव वस्तुसिद्धि:। वृत्त्यनियामकसम्बन्धपुरस्कारेणैव सर्वत्राभावप्रतीतिरस्ति एतद्धनस्वामित्वं चैत्रे नास्ति चैत्रस्वत्वमत्र नास्ति इत्येवाभावप्रत्ययात्, न तु निरूपकत्वादिसम्बन्धं प्रतियोगितावच्छेदकीकृत्य क्वचिदभावधीरस्तीति भाव:[112]। **यत्र चाधारे**ति। यत्पदोपस्थाप्यस्य प्रतियोगिनोऽनुयोगिनीत्यनुषज्यते। अत्र च नामपदजन्यघटोपस्थितिजन्ये[113] नञ्पदजन्यघटसंसर्गाभावबोधे[114] अनुयोग्युपस्थापकपदोत्तरसप्तमी–समभिव्याहृतनञ्पदजन्या[115] नामपदोत्तरसप्तमीसमभिव्याहृत–नञ्पदजन्या वा[116] संसर्गाभावोपस्थिति: कारणम्, इत्थं च यावत् सप्तम्यन्तपदसमभिव्याहारो नञ्पदे न[117] जायते[118] तावन्न घट इत्यादितो घटसंसर्गाभावधीर्न भवत्येवेति। यद्वा[119] भूतले न घट इत्यत्र घटपदोपस्थाप्यस्य घटस्य नञ्पदजन्ये[120] भूतलाधेयत्वप्रकारकसंसर्गाभावबोधे भूतलोपस्थापकपदोत्तर–सप्तमीसमभिव्याहृतनञ्पदजन्यसंसर्गाभावोपस्थिति:[121] कारणम्। भूतलं न घट इत्यादौ तु[122] फलाभावात् तथा विशेषसामग्री न

कल्प्यते सामान्यसामग्री च विशेषसामग्रीं विना न[123] कार्यजननीति एषा[124] दिक्। ननु सप्तम्यर्थस्यैवाभावो[125] नञा बोध्यते तस्य चानुयोगिनि घटे आधाराधेयभाव:[126] सम्बन्ध एवेति पूर्वोदाहरणमेव तदा[127] आह–**अत्र चेति**।[128] **कदाचिद् भूतलावाविति**। तदानीमेव चरमोदाहरणमिति भाव:। चरम-बोधोपष्टम्भकमाह–**अतएवेति**। **एकविशेष्यकत्वेति**। पृथिवीवृत्तिर्गन्धो जलवृत्तित्वाभाववांश्च इति उभयत्रैव गन्धो विशेष्य:। आद्यकल्पानुसारेण[129] तु पृथिवीवृत्तिर्गन्धो जले गन्धाभाव इति बोधे भिन्नविशेष्यकत्वं स्यादिति भाव:।।

२. सप्तम्यर्थस्यैवाभावो भासते इति नियमवादिनां मतमाह[130]-**केचित्त्विति**[131]। नञोऽसमभिव्याहारे[132] यद्विशेष्ये यद्विशेषणतया भासते नञ्समभिव्याहारे[133] तद्विशेषणस्य तद्विशेष्येऽभावो नञा बोध्यते। तथाच भूतले घट इत्यादौ घट एव भूतलवृत्तित्वस्य विशेष्य इति तत्रैव भूतलवृत्तित्वाभावो नञा बोध्यत[134] इत्यर्थ:। **अतएवेति**। यतएवाभावान्वयेऽपि घटस्यैव विशेष्यत्व- मित्यर्थ:। **वचनैक्यनियम** इति। अभावस्य विशेष्यत्वे विशेषणपदस्य विशेष्य-पदसमानवचनत्वनियमात् घटौ न स्त इत्यादौ द्विवचनादिकं न स्यात् किन्तु अभावस्यैकत्वेन[135] घटो नास्तीत्येकवचनमेव स्यात्, घटस्य विशेष्यत्वे च तस्य द्वित्वबहुत्वयो:[136] क्रियापदस्यापि द्विवचनादिकं युक्तमेवेति[137] भाव:। यद्यपि भूतले घटो नास्तीत्यत्र सप्तम्यर्थो निरूपितत्वं तच्च धात्वर्थे विद्यमानत्वे, तच्चाख्यातार्थे[138] आश्रयत्वे[139], तच्च नञर्थे अभावे स च[140] घटेऽन्वेतीति भूतलनिरूपितविद्यमानत्वाश्रयत्वाभाववान् घट इति अन्वयबोधेऽभाव[141]एव साक्षाद् घटे विशेषणम्, न त्वाख्यातार्थ:। तथापि परम्परया विशेषणस्यापि विशेष्यसमानवचनत्वमौत्सर्गिकं चैत्रो न पचतीत्यादौ दृष्टत्वादित्याशय:। न चैकघटवति भूतले घटौ न स्त इति न स्यात्, द्वित्ववद्घटत्वावच्छेदेन[142] तद्भूतलनिरूपितविद्यमानत्वाश्रयत्वाभावस्याभावात्, तादृशद्वित्वसामानाधिकरण्येन[143] नञर्थस्यान्वये घटद्वयवत्यपि भूतले घटौ न स्त इति स्यादिति वाच्यम्। तादृशद्वित्वत्वावच्छेदेन नञर्थसामानाधिकरण्यस्यान्वयात्[144], घटद्वयवति भूतले च[145] अधिकरणान्तरीयघटद्वित्वे तद्भूतलास्तित्वाभावसामानाधिकरण्य-सत्त्वेऽपि तद्घटद्वयद्वित्वे तदभावेन घटौ न स्त इति प्रयोगस्य बाधितार्थकत्वात्। एवं घटा न सन्तीत्यत्रापि बोध्यम्। **तेषामिति**। अनियमपक्षे तु तत्र सत्ताभावो[146] जातिवृत्तिरित्यन्वयबोधे[147] नानुपपत्तिरिति भाव:। समवायेन सम्बन्धसामान्येन वा जातिवृत्तित्वस्याभावो नञा प्रत्याय्य:। आद्ये **जातिसमवेतत्वस्येति**[148] द्वितीये **सम्बन्धान्तरेणेति** एकार्थसमवायादिनेत्यर्थ:। वस्तुतस्तु **जातौ न सत्तेत्यादौ** सत्तापदं सत्तासमवायपरं[149] सप्तम्यर्थश्चानुयोगित्वं

तथाच जात्यनुयोगिकत्वा- भाववान्[150] सत्तासमवाय इत्यन्वयबोधे नानुपपत्तिः न तु गतिरेव नास्तीति तदर्थः। अतएव **गतिश्चिन्तनीये**त्युक्तम्।। **सप्तम्यर्थे**ति। यद्यपि विशेषणस्यैवाभावो बोध्यत इति नियमस्यैव[151] न रक्षणं तथापि प्रथमान्तस्यैव विशेष्यत्वे वचनैक्यनियमोपपत्तिस्तावताप्युपपन्नेत्याशयः[152]। अत्र सप्तम्यर्थान्वयेन जातिवृत्त्यभावस्य प्रतियोगितया सत्तायामन्वयेन जातिवृत्त्यभावीया सत्तेत्यन्वय- बोधः। तथाच द्रव्ये न सत्तेत्यपि स्यात्। तत्र सत्ताया विशिष्टाभावस्य सत्त्वात्। नच सत्तात्वावच्छिन्नप्रतियोगितासम्बन्धः, अनतिरिक्तवृत्तित्वस्या- वच्छेदकत्वस्य तत्रापि सत्त्वात्। अनुयोगितावच्छेदके[153] स्वरूपसम्बन्ध- रूपावच्छेदकत्वमन्तर्भाव्य व्युत्पत्त्यन्तरकल्पने गौरवादित्यस्वरसः **कश्चिदि**-त्यनेन सूचितः। वस्तुतस्तु घटौ न स्त इत्यादितो द्वित्वाद्यवच्छिन्नघटाभाव[154] एव विशेष्यतया प्रतीयते नञः क्रियापदसमभिव्याहारे[155] तस्य प्रतियोगिपदेन समानवचनत्वमपि तन्त्रम्। अतएव घटौ नास्तीति न प्रयोगः। द्विवचनादिकं तु[156] प्रयोगसाधुत्वार्थम्। एवंच भूतले घटौ न स्त इत्यादेर्भूतलाधेयो[157] द्वित्वावच्छिन्न-घटाभावोऽस्तीत्येव[158] वाक्यार्थ इति ध्येयम्।।

३. फलमुखेन नियामकं वक्तुम् अन्योन्याभावबोधस्थलं[150] द्रढयति-**यत्र चे**ति। **तत्रान्योन्ये**ति। अभेदेन विशेषणत्वयोग्यस्य विशेष्येऽन्योन्याभावो नञा बोध्यते इत्यर्थः। **अयं घटो नील** इत्यनेनाभेदान्वयो दर्शितः। **अत्र** नञा अन्योन्या-भावबोधने। **समाने**ति। दधि न[160] सुन्दरमित्यादावपि लुप्तविभक्त्यनुसन्धाने-नैव शाब्दधीरिति भावः। चैत्रो न पचतीत्यादौ आख्यातस्य धर्मिपरतायां चैत्रे पाककर्तुः पचति न स्तोकमित्यादौ पाके स्तोकभेदस्य[161] प्रतिपादने समानविभक्तिकत्वाभावादाह[162]-**विरुद्धविभक्तिविरहो**[163] **वे**ति। निर्विभक्ति-कासमस्तनीलादिपदसमभिव्याहृतनञ्पदस्थले विरुद्धविभक्तिविरहेऽप्य-साधुत्वादेव नान्वयबोधः। वस्तुतस्तु उक्तैक्यमात्रमेतत् न त्वनेन रूपेण हेतुत्वम्। अनुयोगिप्रतियोग्युपस्थापकनामपदयोः समभिव्याहारे समानविभक्ति-कत्वं तन्त्रम्। तथाच घटो न नील इत्यादौ घटपदार्थान्वितनीलपदार्थान्योन्याभाव-बोधने घटपदसमानविभक्तिकनीलपदसमभिव्याहृतनञ्पदत्वेन, चैत्रो न पचतीत्यादौ धर्मिपराख्यातसमभिव्याहृतनञ्पदत्वेन[164], न स्तोकं पचतीत्यादौ क्रियाविशेषणसमभिव्याहारे द्वितीयान्तस्तोकादिपदसमभिव्याहृतत्वेन विशिष्यैव हेतुत्वं बोध्यम्। अन्यथा न पचतीत्यादौ धर्मिपराख्यातप्रतियोगिपदोत्तरविभक्तेः[166] न स्तोकं पचतीत्यादावनुयोगिक्रियापदोत्तरसुविभक्तेश्चाप्रसिद्धतया प्रतियोगि-पदोत्तरविभक्तिविरुद्धविभक्तिशुन्यानुयोगिपदसमभिव्याहृतनञ्पदत्वेनानुयोगि-पदो-त्तरविभक्तिविरुद्धविभक्तिशून्यप्रतियोगिपदसमभिव्याहृतनञ्पदत्वेन वा

हेतुत्वस्यानुगतस्यासम्भवादसङ्गत्यापत्तेरिति ध्येयम्। **अतएवेति**। यतएव समानविभक्तिकत्वं तन्त्रमित्यर्थः[167]। **यजतिषु** यागेषु, **ये यजामहे**[168] ये यजामहपदवन्तं[169] मन्त्रम्, **करोति** उच्चारयति[170], **अनुयाजः** यागविशेषः। **एकवाक्यतेति**[171]। अनुयाजभिन्नेषु[172] यजतिषु 'ये यजामह' करणविधावर्थैक्यादेकवाक्यत्वं[173] यजतिषु[174] 'ये यजामह' करणविधौ अनुयाजेषु तत्करणनिषेधे च विधेः[175] अर्थभेदाद्भिन्नवाक्यता स्यादिति भावः। **ये यजामहमित्यादे** रिति[176] प्रथमानुसन्धानस्य एकवाक्यार्थबोधेनैव[177] पर्यवसितत्वादिति भावः[178]। **आदिना** करोतीत्यस्य परिग्रहः[179]। इदं च मणिकारादिलिखनमनुसृत्य व्याख्यातम्[180]। 'नानुयाजेषु करोति' इत्येव[181] वैदिकसम्मतः पाठः[182]। ननु नानुयाजेष्वित्यस्य निषेधविधित्वेऽनुयाजाधिकरणक-तादृशमन्त्रकरणमनिष्टकरणमिति[183] वाक्यार्थे सप्तम्यर्थस्यान्वयात् सप्तम्याः सार्थकत्वं स्यात्, पर्युदासे तु तद्वैयर्थ्यमतस्तदनुरोधात् गौरवादिकमपि न्याय्यमत आह-**विशेषणेति**। विशेषणविभक्तेः पदसाधुत्वप्रयोजनसत्त्वान्न वैयर्थ्यमिति भावः। नन्वेवं प्रकारीभूतविभक्त्यर्थोपस्थितिं विना कथं नीलो घट इत्यादौ नामार्थयोरन्वयोऽत[184] आह-**नामार्थयोरिति**।[185] एतत्तु[186] आख्यातवादार्थविवेचने[187] प्रपञ्चितम्[188]। मतान्तरमाह-**लाघवेनेति**[189]। अभेदातिरिक्तसम्बन्धेन नामार्थान्वयबोधत्वापेक्षया नामार्थान्वयबोधत्वस्य लघुत्वादिति भावः। **तथात्वं** प्रकारीभूतविभक्त्यर्थोपस्थितेस्तन्त्रत्वम्[190]। तर्हि नीलो घट इत्यादौ का गतिरत[191] आह-**विशेषणेति**। शुचि पुष्पमित्यादौ असमासे लुप्तविभक्त्यनुसन्धानं विना साधुत्वमेव नास्तीति यत्र विभक्त्यनुसन्धानं[192] विनापि साधुत्वं तत्र व्यभिचारमुद्धरति-**नीलोत्पलमिति**। अत्राप्यनित्यसमासत्वेन[193] विग्रहवाक्यानुसन्धानादेव शाब्दबोध इति यदि[194] ब्रूयात् तदाह-**चित्रगुरिति**। बहुव्रीहेर्नित्यसमासत्वेन विग्रहवाक्याभावेऽपि चित्रगवोरभेदान्वयबोधोत्तरं चित्रगोस्वामिनि लक्षणायां फलबलेन विभक्त्यनुसन्धानं कल्प्यमित्यर्थः। तत्र[195] विभक्त्यनुसन्धानं[196] विनापि शाब्दधिय[197] आनुभविकत्वात् नीलो घट इत्यादावभेदस्य संसर्गतयैवानुभवाच्चाह-**मत** इति। विभक्त्यर्थस्याभावबोधने[198] व्युत्पत्तिविरोधो नास्तीति दृष्टान्तमाह-**न राज्ञ इत्यत्रेति**। **एकवाक्यतानुरोधादि**त्याद्यनुषज्यते[199]। विशेषणविभक्तेर्यद्यभेदार्थकत्वं[200] तदा[201] अभेदविशेषणत्वेनोपस्थितस्य नामार्थस्य नञर्थान्योन्याभावे विशेषणत्वेनान्वयस्यायोगात्[202] योगेऽपि वा विभक्त्यर्थान्वयत्यागस्यैव दोषत्वादिति भावः। इत्थं च चैत्रो न पचतीत्यादौ तिङो धर्मिपरतायां नञा[203] भेदप्रतीतेर्जननात्[204] पृथक्शक्तिकल्पनमिति[205] ध्येयम्।।

4. एकवाक्यतानुरोधादित्याद्युक्तयुक्तेर्भेदपरतेति[203] स्वयमुक्तम्, **नानुयाजेष्वित्यत्र**

निषेधपरत्वे तस्य प्राप्तिपूर्वकत्वात् यजतिष्वित्यनेन तस्य प्राप्तिर्वाच्या तथाचैकविषयकविधिनिषेधे[207] विकल्पापत्तेः भेदपरतेति स्मार्तानां युक्तिं दूषयितुमुपन्यस्यति[208]—**यत्त्विति**। **तदितरपरतायाः**[209] विशेषेतरपरतायाः[210]। वैदिकशब्दस्य पक्षसमत्वाल्लौकिकशब्दे[211] व्युत्पत्तिं द्रढयति-**ब्राह्मणेभ्य** इति। **विकल्पानवकाशादि**ति। तथाचात्रापि यजतिष्वित्यादिसामान्य-विधेरनुयाजभिन्नयागपरमित्येकविषयकविधिनिषेधयोरप्रसङ्गादिति[212] भावः। **तत्रापि** कौण्डिन्याय नेत्यत्रापि[213]। **विरुद्धे**ति[214]। समानविभक्तिकत्ववत् समानवचनत्वस्यापि[215] नियामकत्वादिति भावः। इदमेव दृष्टान्तेन[216] द्रढयति-**न खल्वि**त्यादिना। **महतो राज्ञ** इति अभेदान्वयबोधकसमभिव्याहारे[217] नञा अन्योन्याभावस्य बोधनात् भेदान्वयबोधेऽपि[218] समानवचनत्वस्य नियामकत्व-मुक्तं[219] द्व्यादिशब्दानां नित्यद्विवचनान्तत्वेन तथा अत्र तु न तथा व्युत्पत्तिरतः-**कथंचिदि**ति। **द्वितीयस्ये**ति। ब्राह्मणेभ्यो दधि दातव्यं कौण्डिन्याय नेत्यत एव कोण्डिन्यभिन्नेभ्यो ब्राह्मणेभ्यो[220] दधि[221] दातव्यमित्यर्थलाभादित्यर्थः[222]। वस्तुतस्तु विभक्त्यर्थे एकत्वद्वित्वादेरविव-क्षितत्वेन[223] भूपास्तृणमित्यादौ एकतृणतुल्यबुद्ध्युदयाद्विरुद्धवचनाभ्यामप्य-भिन्नत्वबोधो[224] भवत्येव, परन्तु न कौण्डिन्यायेत्यादौ[225] विभक्त्यर्थे एकत्वादि-विवक्षाया[226] वीजाभावान्न तथात्वसम्भवः[227] इति[228]। **अतएवे**ति। यतएव विशेषनिषेधे सामान्यविधेस्तदितरपरत्वम्[229] अतएवेत्यर्थः। तत्रापि पर्युदासमाशङ्क्य निषेधति-**न ही**ति। **रात्रौ श्राद्धं न कुर्वीते**त्यस्य रात्रि-भिन्ने श्राद्धं कुर्वीतेत्यर्थः। तथाचामावास्यायामित्यादितो रात्रौ श्राद्धप्रसक्तिः स्यादिति भावः। नन्वेकवाक्यतया रात्रिभिन्नायाममावास्यायां श्राद्धं कुर्वीतेत्यर्थ-कत्वे कुतो रात्रौ प्रसक्तिरत आह-**न खल्वि**ति। क्रियायुक्तवाक्ययोरेक-क्रियापदार्थस्यानन्वयेन तथैकवाक्यत्वासम्भवादिति भावः। **येनेदमि**ति। **इदं** रात्रौ श्राद्धं न कुर्वीतेति वाक्यम्। **तेन** श्राद्धविधायकवाक्येन। **नापीदमि**ति। **इदं** श्राद्धविधायकवाक्य[230] नानुयाजेष्वित्यादेरप्यानुषङ्गिकक्रियावत्त्वात् **पृथगि**ति। **विकल्पापत्तिरि**ति[231]। रात्रौ श्राद्धस्य रागजप्रसक्त्यभावेन वैधी प्रसक्तिर्वाच्या तदर्थममावास्यायामित्यादिविधेरेव रात्रिपरत्वमपि[232] कल्प्यमित्येकविषयकतया[233] विकल्पः स्यादित्यर्थः। **निषेधानुपपत्तिरि**ति[234]। प्राचां मते वैधस्य रागाधीनस्य वा कर्तव्यताज्ञानस्य निषेधविधिजन्यशाब्दबोधे[235] हेतुत्वादिति भावः। अत्र सोपहासमाह-**साधीयानि**ति। **शाब्दबोधेऽपी**ति। अत्र अभावलौकिकप्रत्यक्षे[236] आहार्यरूपा[237] प्रसक्तिः कारणं कदाचित् सम्भवदपि[238] शाब्दबोधे त्वन्यादृशप्रसक्तेः[239] कारणत्वं न कस्याप्यनुमत-मित्यर्थः। **वैयर्थ्यमि**ति[240]। रात्रौ श्राद्धकरणस्य रागाद्विधितो वा अप्राप्तौ

तन्निषेधप्रतिपादन[241] निष्प्रयोजनकमिति[242] भावः। यद्यपि न कलञ्जं भक्षये-दित्यादाविव निषेधविधेः प्रत्यवायरूपानिष्टसाधनत्वमेवार्थः तथापि तत्र भक्षणस्य इष्टसाधनत्वेन तदभावस्य[243] बाधेन[244] बोधयितुमशक्यत्वात् निन्दार्थवादप्रायश्चित्तोपदेशाच्चानिष्टसाधनत्वमेव निषेधविध्यर्थः[245]। इह तु इष्टसाधनत्वाभावबोधने बाधाभावान्निन्दार्थवादाद्यभावात् प्रत्यवायकल्पनागौर-वाच्च इष्टसाधनत्वाभाव एव विध्यर्थः[246]। इष्टं चामावास्यायामित्यादिविध्युप-स्थितं ग्राह्य[247] प्राकरणिकत्वात्। तथाच अमावास्यायामित्यादिविधेः रात्रीतरामा-वास्यापरत्वे विधानाभावादेव तादृशेष्टसाधनत्वाभावो बोध्यते इति तद्बोधाय[248] रात्रौ[249] श्राद्धं न कुर्वीतेति वाक्य[250] व्यर्थमिति भावः। **तात्पर्येति**। यदि रात्रौ श्राद्धं न निषिध्येत[251] तदा कदाचिदमावास्यायामित्यादिविधेः रात्रीतरामावास्या-तात्पर्याननुरोधेन[252] रात्रावपि श्राद्धकरण[253] प्रसज्येत[254]। अतो रात्रौ श्राद्धकरणे निषिद्धेऽमावास्यापदस्य[255] रात्रीतरामावास्यापरत्वनिश्चयान्नैषा प्रसक्तिः एवं-चामावास्यायामित्यादिविधेस्तात्पर्यग्राहकतयैव तस्य[256] सार्थकत्वमिति[257] भावः। अत्र <u>मीमांसकाः</u> एकवाक्यत्वं हि[258] द्विविधं विशिष्टैकार्थप्रतिपत्तिजनकत्व[259] तत्तात्पर्यजनकत्वं च। रात्रौ श्राद्धं न कुर्वीतेत्यादेः क्रियान्तरवैयर्थ्येनाद्यस्या-सम्भवेऽपि द्वितीयस्य सम्भवे न किञ्चिद्बाधकं यथा 'अग्निहोत्रं जुहोति' 'दध्ना जुहोति'[260] इत्यत्र। तत्र हि 'अग्निहोत्रं जुहोति' इति प्रधानविधिप्रवृत्तौ केन द्रव्येणेति द्रव्याकाङ्क्षायां दध्ना जुहोतीति विधिप्रवृत्तिः। तेन हि प्रधानविधेरेकदेशं जुहोतीत्यनेनानूद्य दधिरूपं द्रव्यं करणत्वेन विधीयते। यज्जुहोति तद्दध्ना इत्येवं बोधिते[261] दधिकरणकोऽग्निहोत्रहोम इष्टसाधनमित्ये-वंरूपविशिष्टैकार्थपरत्व[262] विधिद्वयस्य निर्वहति। तथामावास्यायामित्यादिप्रधान-विधिप्रवृत्तौ कालविशेषाकाङ्क्षायां यत् श्राद्धं कुर्वीत तद्रात्रिभिन्ने इति रात्रौ श्राद्धं न कुर्वीतेत्यनेन पर्युदासलक्षणया बोधिते रात्रिभिन्नामावास्याधिकरणक-श्राद्धकरणमिष्टसाधनमित्यर्थपरत्व[263] विधिद्वयस्य[264] निर्वहति। न च मुख्या-र्थानुरोधान्निषेधविधित्वमेव[265] युक्तम्। एकप्रकरणाम्नातत्वेन तदाकाङ्क्षा-धीनत्वेन[266] चामावास्यादिविशेषणमहिम्ना[267] रात्रिभेदविधित्वे[268] निश्चिते[269] सम्भवार्थमुख्यार्थत्यागस्याप्यदोषत्वात्[270]। अतएव नेक्षेतोऽत्यन्तमादित्य-मित्यादेर्व्रतप्रकरणाम्नातत्वेन[271] मुख्यार्थं परित्यज्य लक्षणया ईक्षणविरोधि-संकल्प[262] कुर्यादित्यर्थकत्वं सिद्धान्तितम्। अतएव 'दीक्षितो न ददाति' इत्यादेरपि[273] न निषेधविधित्वं किन्तु दीक्षितस्य दानाभावादिरूपाङ्गविधि त्वम्-इत्याहुः।

तदर्थत्वात्[274] निषेधविधिप्रयोजनत्वात्[275]। नन्वेवं विकल्पस्थलमेव दुर्मिल-मित्यत[276] आह-**एकविषयतयेति**[277]। **अनन्यगत्येति**[278]। अत्र[279] सामान्यविशेष-

भावाभावेन[280] विशेषेतरपरत्वस्यासम्भवादिति भाव:। ननु 'न कलञ्जं भक्षयेत्' इत्यादौ नञर्थे विध्यर्थस्य इष्टसाधनत्वादे: प्रतियोगितयान्वयस्य व्युत्पत्तिसिद्ध-त्वात् अत्र तथान्वये ग्रहणविधिना तत्रेष्टसाधनत्वादेर्बोधनाद् विरोध इत्यत आह-**अत्र चे**ति। नेष्टसाधनमित्यादिकमि**त्यादि**ना[281] बलवदनिष्टाननु-बन्धिकृतिसाध्ययो:[282] परिग्रह:[283]। ग्रहणाभाव इष्टसाधनमि[त्यादिकम्] **इत्यादि**ना बलवदनिष्टाननुबन्धी कृतिसाध्यश्चेत्यस्य संग्रह:।[284] नन्वेवं धात्वर्थस्य नञर्थे[285] प्रतियोगित्वेनान्वये[286] नञर्थे च[286] विभक्त्यर्थेष्टसाध नत्वादेरन्वये[288] व्युत्पत्तिविरोध: इत्यत आह-**व्युत्पन्नश्चे**ति। **नञि**ति।नञ्समभिव्याहृतो यो धातुस्तदर्थस्येत्यर्थ:।। **अतएव** धात्वर्थस्याभावेऽपि विभक्त्यर्थान्वयस्य व्युत्पत्तिसिद्धत्वादेव। प्राभाकरा इति। तेषां वैदिकलिञ: कार्ये शक्ति:। तत्र च प्रकृत्यर्थो विषयतया अन्वेति। तथाच 'स्वर्गकामो यजेत' इत्यत्र स्वर्गकामस्य यागविषयकं कार्यमित्यन्वयधी:। 'न कलञ्जं भक्षयेत्' इत्यत्र कलञ्जभक्षणस्य नञर्थेऽभावेऽभावस्य[289] च लिङर्थे कार्ये निषेधापूर्वरूपे विषयत्वेनान्वये[290] कलञ्जभक्षणाभावविषयकं कार्यमित्यन्वयधीरिति फलबलाद् व्युत्पत्त्यन्तरं कल्प्यमिति भाव:। अतएव च

नामूढस्येतरोत्पत्ते:[292] (न्यायसूत्रम् 4-1-6)
नानुपमृद्य प्रादुर्भावात् (न्यायसूत्रम् 4-1-14)

इत्यादेर्नञर्थे विभक्त्यर्थस्यान्वयाद् अमूढस्येतरोत्पत्त्यभावात्[292] अनुपमृद्य[293] प्रादुर्भावाभावादित्यर्थमाहु:[294]। क्वचिद्विभक्त्यर्थप्रतियोगिकाभावस्य[295] धात्वर्थे[296] क्वचिच्च धात्वर्थप्रतियोगिकाभावे विभक्त्यर्थान्वये[297] किं नियामकमत आह-**नियमस्त्व**ति[298]। तात्पर्यादीति **आदिना** प्रकरणादिपरिग्रह:। ननु षोडशिग्रहणस्याङ्गत्वेनाफलकत्वादिष्टसाधनत्वाभावबोधनेऽपि[299] न ग्रहणविधि-विरोध:। एवं ग्रहणाभावस्याप्यङ्गत्वेनाफलकत्वात्[300] तत्रेष्टसाधनत्वबोधने[301] बाध इत्यत आह-**मुख्यफले**ति। फलवत्सन्निधावफलमङ्गमित्यङ्ग- लक्षणं[302] तत्र चाफलत्वं[303] मुख्यफलाजनकत्वं न तु सर्वथैव फलशून्यत्वमिति भाव:[304]। **उपकारे**ति प्रधानोपकारेत्यर्थ:। **अविरुद्धम्** अङ्गत्वेनाविरुद्धम्। ग्रहणा-भावेनैवेष्टसिद्धौ[305] कष्टसाध्ये[306] ग्रहणे कथं प्रवृत्तिरत आह-**ग्रहणविधी**ति। अतिशयितफलाकल्पने अननुष्ठानलक्षणाप्रामाण्यं ग्रहणविधे: स्यादिति भाव:। अतिशयितपरमापूर्वं न[307] स्वत: काम्यम् अत:[308] कथं तदिच्छया ग्रहणे प्रवृत्त्या विधेरननुष्ठानलक्षणाप्रामाण्यं[309] न स्यादत आह-**तस्माच्चे**ति। **मुख्यं**[310] **फलं** स्वर्गादिरूपम्।।

५. ननु भूतले न घट इत्यादौ प्रतियोग्यभावयोः प्रतियोग्यनुयोगिभावः भूतलं न घट इत्यादौ चाभावाधिकरणयोराधाराधेयभावः[311] प्रकारतया न[312] भासते तदुपस्थापकषष्ठ्यादेरभावात् न[313] संसर्गतया नामार्थयोर्भेदेन साक्षादन्वयस्याव्युत्पन्नत्वादत[314] आह–**प्रतियोग्यभावयो**रिति। **निपातातिरिक्ते**ति। फलबलान्निपाताज्जन्यभेदान्वयबोधे[315] विभक्त्यर्थोपस्थितेस्तन्त्रत्वं कल्प्यमिति[216] भावः। एतत्तु[317] एवकारार्थसारमञ्जर्यां[318] प्रपञ्चितमस्माभिः[319]। **अतएवे**ति। यतएव निपातार्थान्वयमात्रे न विभक्त्यर्थापेक्षा अतएवेत्यर्थः। इवादीति। चन्द्र इव मुखमित्यादौ इवार्थे सादृश्ये चन्द्रस्य प्रतियोगितया मुखस्य चाधिकरणतया[320] अन्वयः। **आदिना** एव–वा–तु–चादिपरिग्रहः[321]। ननु नञोऽभावमात्रार्थकत्वे अघटं भूतलमित्यादौ भिन्नाभ्यां रूपाभ्यामेकधर्मिबोधकत्वरूपं सामानाधिकरण्यं न स्यात् एवमघटः पट इत्यादौ अन्वयश्चेत्यत आह–**अघटमि**ति। संसर्गाभावान्योन्याभावार्थकनञ्भेदेनोदाहरणद्वयम्। अघटः पट इत्यत्र[322] सामानाधिकरण्यानुरोधात्[323] नञो लक्षणया[324] अभाववत्परतेति मणिकारेणोक्तम्[325]। तत्र च तत्पुरुषसमासेऽपि[326] अघट इत्यस्यैव सम्भवात्। तेन[327] घटभिन्नस्यैव बोधनात् संसर्गाभाववत्परत्वं[328] नञो न लभ्यत इत्यतो बहुव्रीहिसमासं[329] स्पष्टीकर्तुम् अघटमिति नपुंसकलिङ्गमेव निर्दिष्टम्। तत्र च न विद्यते घटो यत्रेति विग्रहेण संसर्गाभावस्य बोधसम्भवात्[330]। न च चित्रगुपदादावुत्तरपद[331] एव लक्षणाया व्युत्पादितत्वात् प्रकृतेऽप्यघटपदस्यैवाभाववल्लाक्षणिकत्वेऽसङ्गतिरिति[332] वाच्यम्। चित्रगवोरभेदान्वयबोधपुरःसरं[333] चित्रगोसम्बन्धिनि लक्षणायां गोपदार्थस्य[334] साक्षात्सम्बन्धः चित्रपदार्थस्य परम्परासम्बन्धो भासत[335] इति साक्षात्सम्बन्धेन[336] लाघवात् गोपद एव लक्षणेति तद्बीजम्। अत्र च[337] घटाभावयोरन्वयबोधोत्तरं घटाभावसम्बन्धिन उपस्थितौ नञ्पदार्थस्यैव साक्षात्सम्बन्धभानमिति पूर्वपद एव नञि[338] लक्षणायाः सर्वसम्मतत्वात्। एतेनाघटमिति तत्पुरुषसमास[339] एव द्वितीयान्तं पदं पश्येति[240] क्रिया चाध्याहार्या, प्रथमान्तत्वे तु[341]

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः (पा.सू. 2-4-26)

इत्यनुशासनात् अघटो भूतलम् इति स्यादिति व्याख्यानम् अनादेयं संसर्गाभावार्थकनञि[342] तत्पुरुषस्यासाधुत्वात्[243]।।

६. नामार्थयोर्भेदान्वयबोधे प्रकारीभूतविभक्त्यर्थोपस्थितेस्तन्त्रत्वे[344] निपातातिरिक्तं[245] विशेषणमनिवेशयतां मतमाह–**केचित्त्वि**ति। घटस्याभाव इत्यादौ षष्ठ्यर्थोऽनुयोगित्वम्[346]। तत्र च घटस्य निरूपितत्वेनाभावस्य चाधिकरणत्वे–

नान्वयः[247]। न तु प्रतियोगित्वं षष्ठ्यर्थः[348] घटस्याधेयत्वेनाभावस्य च निरूपकत्वेनान्वय[349] इति। तथा सति[350] घटीयाभावो[351] न घटस्येति स्यात्, घटनिष्ठप्रतियोगित्वस्याभावेऽभावसत्त्वात् निरूपकत्वादिसम्बन्धस्य[352] चाभावप्रतियोगितानवच्छेदकत्वात्[353]। एवंच न घट इत्यादौ प्रतियोगित्वस्य सुबर्थत्वे घटस्य तत्राधेयत्वेनान्वयकल्पने घटस्याभाव इत्यादौ विभक्त्यर्थे निरूपितत्वसम्बन्धेन प्रकृत्यर्थस्यान्वयोऽन्यत्र[354] क्लृप्तो भज्येत। एवं पटस्याभावो न घट इत्यत्र प्रथमायाः षष्ठ्यर्थलाक्षणिकत्वे घटानुयोगित्वाभावः[355] प्रतीयते प्रतियोगित्वस्य प्रथमार्थत्वेन[356] नञर्थान्वयानुपपत्तिश्च[357] इत्यतः **अनुयोगित्वे वे**ति[358]। इदं तु बोध्यम्[359]—भूतले न घट इत्यादौ प्रथमार्थस्यानुयोगित्वस्य नञर्थे अधिकरणत्वेनान्वयः। पटाभावो न घट इत्यादौ तु प्रतियोगित्वेनान्वयः। तत्र च[360] प्रकरणादिकमेव नियामकं षष्ठ्यर्थस्यानुयोगित्वे[361] नञर्थेऽधिकरणत्वेनान्वये[362] षष्ठ्यादेर्विशेषणविभक्तित्वं[363] तन्त्रम्। यत्र तु षष्ठीविशेष्यविभक्तिस्तत्र[364] तदर्थस्यानुयोगित्वस्य[365] नञर्थे प्रतियोगित्वेनैवान्वयः। अतएव अयमभावो न घटस्येत्यादौ अभावे घटानुयोगित्वाभावः एव[366] प्रतीयते न तु घटानुयोगित्ववान्[367] अभाव इति नञुत्तरस्य[368] सुपोऽधिकरणत्वम्[369]। तत्र च लक्षणा[370] इत्युभयकल्पनापेक्षया श्रूयमाणनञोऽभाववल्लक्षणा[371] युक्ता इत्याशयेनाह—**नञो**[372] **वे**ति।

ननु विशेष्याविशेष्यपदयोर्विरुद्धविभक्तिराहित्यं[373] अन्योन्याभावबोधने[374] वा प्राङ्नियामकमुक्तम्[375], तत्र विरुद्धत्वं[376] विरुद्धार्थकत्वम् अन्यथा व्यत्ययस्थले[377] कर्माद्यर्थकप्रथमान्तार्थकस्य[378] शुद्धप्रथमान्तार्थत्वेन[379] नञोऽन्योन्याभावबोधा-पातात्[380]। तथाच[381] प्रतियोगिपदोत्तरस्य सुपः प्रतियोगित्वादौ लाक्षणिकत्वेऽनुयोगिपदस्य शुद्धसुबन्तत्वे[382] च ब्राह्मणस्य धनं न मूर्खस्य इत्यादौ नञर्थे भेदे मूर्खानुयोगित्वस्य बोधे नञर्थस्याधिकरणत्वेनान्वये मूर्खभिन्नस्य ब्राह्मणस्येत्यर्थो लभ्यते इति[383] विरुद्धार्थकत्वमेव[384] विभक्तेरिति प्रागुक्तनियामकासम्भवात् अनियमेन सुबर्थप्रतियोगित्वादेरिव तिङादि-षष्ठ्याद्यर्थस्य[385] कृतिसम्बन्धादेरपि नञर्थेऽन्योन्याभावे[386] साक्षादनन्वये[387] न पचति न राज्ञ इत्यादौ पाकानुकूलकृतिभेदस्य राजसम्बन्धभेदस्य च बोधापत्तिः[388]। एवं[389] नञर्थे[390] संसर्गाभावे भेदान्वयोपपत्त्यर्थमनुपयोगिपदे सप्तम्यपेक्षा, स च नञुत्तरस्य सुपोऽधिकरणत्वे[391] लक्षणयैवोपपन्न इति नञोऽभाववल्लाक्षणिकत्वे तु भेदान्वयप्रसङ्गाभावात्[392] अभिदेनान्वये[393]। च[394] सप्तम्या अप्रयोजकत्वात्[395]। अनुयोगिसमानविभक्तिकार्थस्यापि नञा संसर्गाभावबोधापत्तिरत आह—**विभक्त्यर्थे**ति। विभक्त्यर्थस्यान्योन्याभावबोधेऽनु-योगिसमानविभक्तिकार्थस्य च[396] संसर्गाभावबोधे नञो न सामर्थ्यमित्यर्थः[397]।

तथाच[398] फलबलात् नञ्जन्येऽन्योन्याभावबोधे विभक्तिभिन्नपदजन्या प्रतियोग्युपस्थितिः संसर्गाभावबोधे चानुयोगिसमानविभक्तिकातिरिक्तपदजन्या प्रतियोग्युपस्थितः[399] च[400] कारणं कल्प्यमिति भावः। न चैवं पचतीत्यादौ[401] तिङादेर्धर्मिपरतायां पाककर्त्रादेरन्योन्याभावबोधादन्वयः स्यादिति वाच्यम्, इष्टत्वात्। विभक्त्यर्थस्य[402] शक्त्या निरूढलक्षणया वा[403] विभक्त्युपस्थाप्यस्य कृत्यादेरित्यर्थ इति कश्चित्। न च[404] नामार्थस्य संसर्गाभावबोधे सप्तम्यन्तानुयोगिपदोपस्थापितस्य[405] समभिव्याहृतनञ्पदत्वादिना हेतुत्वेनैवातिप्रसङ्गः[406]। अनुयोगिसमानविभक्तिकार्थस्य संसर्गाभावबोधनाय[407] किमिति नियामकान्तरानुसरणमिष्टम्[408], भवतापि[409] भूतले न[410] घट इत्यादौ घटपदोत्तरसप्तम्याः प्रतियोगित्वादौ लक्षणया भूतले घटप्रतियोगिकसंसर्गाभावबोधस्य[411] वारणासम्भवात्। **कृतिसम्बन्धादे**रिति न पचतीत्यत्र कृतौ न राज्ञ इत्यत्र सम्बन्धस्य[412] नान्योन्याभावबोधनमित्यर्थः।। इति।।

श्रीभवानन्दसिद्धान्तवागीशेन विनिर्मितः।
नञ्वादार्थप्रदीपोऽयं निहन्तुं सुधियां तमः।।[413]

संदर्भसंकेतः

1. P (p. 1010): संसर्गाभावइत्यादि
   Q (12b2): संसर्गाभावेति
   R (1b1) records abenedictionbefore संसर्गाभावः श्रीगणेशाय नमः।।
2. Q (1b1): ०भेदसूचनाय
3. R (1b2): ०भाववत्त्वं
4. R (1b2): कत्वमित्यर्थः for कमित्यर्थः
5. R (1b3) वशात् for बलात्
6. Q (1b3): समवायावच्छिन्न०
   R (16b3): समवायवच्छिन्ना०, Omits च०
7. R (1b3): प्रिति०
8. R (1b4):भानेनैव
9. R (1b4): बोधे for बोध
10. R (1b4) omits त्वं०
11. P (p. 1011) omits पटो०
12. P (p. 1012): प्रकारतया
13. R (1b5): तथाविधानात्
14. P (p. 1012) omits हि०
    R (1b6): ० भावस्यैव
15. P (p. 1012): अत्र च for तत्र

16. P (p. 1012): ०त्यन्ताभावध्वंसप्रागभाववत्त्वादिबुद्धित्वादिना
17. P (p. 1012), R (1b8) omit द्वय०
18. P (p. 1012): लाघवेन
19. P (p. 1012) add इति after ० च्छेदकं०
20. R (1b9): समवायावच्छिन्न०
21. R (1b9): निर्वाह इति
22. P (p. 1012), R (1b10): नव्यास्तु
23. P (p. 1012): संसर्गारोपपूर्वकप्रतीतिविषयतावत्त्वं
    R (1b10): संसर्गारोपजैन्यपूर्वकप्रतीतिविषयाभावत्वं
24. R (1b10): ० प्रतियोगिकाभावत्वं
25. P (p. 1013): ०प्रत्यक्षे हेतुत्वे
26. P (p. 1013) adds च after the word.
    R (1b11): व्याप्तिश्च
27. P (p. 1013): संसर्गाद्यवच्छिन्न.
    R (1b11): संसर्गात्वावच्छिन्नप्रतियोगित्वाद्यनिरुक्तेश्च
28. P (p. 1013): संयोगयन्योभावाद्यतिव्याप्तेश्च
    R (1b12): संयोगान्योन्याभावेऽतिवयाप्तेश्च
29. P (p. 1013): सयोगतया
    R (1b12): संसर्गातया
30. P (p. 1013): चावच्छेदकताया for वा
    R (1b13):चावच्छेदकतया for वा
31. P (p. 1013), R (1b13) omit अवच्छेदकतया.
32. P (p. 1013): तादात्म्यावच्छिन्नाभावत्त्व
    R (2a1) omits सम्बन्ध०
33. R (2a2): इत्याकारकानुगतः प्रतीति०
34. P (p. 1014): तथा for तादृश
35. Q (17a4) omits च०
36. R (2a3): नास्तीत्यन्ता०
37. P (p. 1015): ०भावत्वंद्वयमपि
    R (2a5): ०भावत्वंच द्वयं च
38. Q (17a5): प्राच०
39. P (p. 1016): स्यादित्यत
40. Q (17a6): अन्वयीति
41. R (2a7): प्रतियोगितावच्छेदसम्बन्धेन
42. P (p. 1016): योऽन्वयः
43. R (2a7): तत्तावच्छेदकं
44. P (. 1016), R (2a7) omit the word.
45. Q (17b1): घटप्रकारका०
    R (2a9): ०बोधजनकस्वाभाव्यं
46. P (p. 1017), R (2a10) omit the word.
47. P (p. 1018), R (2a11): ०समभिव्याहारात्
48. R (2a11): तदसमभिव्याहृतत्वेनाज्ञातत्वम् for the entire portion: तदसमभि · · · ज्ञातत्वम्
49. P (p . 1018): प्रयुङ्क्ते
50. P (p. 1018), R (2a12) omit च०
51. P (p. 1018), R (2b1): लोहितस्या०
    Q (17b3): लोहित्यस्या०

52. P (p. 1019): भाव for भातत्ववह्नित्वे
R (2b2): भातस्य for भातत्वंवह्नित्वे
53. P (p. 1019) omits the word.
54. Q (17b3): ससर्गतया
55. Q (17b4): ०तादृश
56. P (p. 1019), R (2b3): सम्बन्ध for संसर्ग
57. R (2b3): विषयतायास्तु for विषय:इयांस्तु
58. Q (17b4) omits च.
59. P (p. 1020), R (2b5) omit the wrod.
60. R (2b5): ०तादृशाविशिष्टप्रतियोगितान
61. P (p. 1020): लोहित: स्फटिक
62. P (p. 1020): संसर्गांशे
63. P (p. 1021): प्रतियोगित्वं
64. P (p. 1021): विसकलितमेव
R (2b8): विषकलितमेव
65. P (p. 1021): संसर्गस्तदा
66. Q (18a1): ०स्तदा अवच्छिन्नत्वेऽपि
R (2b10): ०स्तदात्म्यावच्छिन्नत्वेऽपि
67. P (p. 1022): संसर्ग for सम्बन्ध
68. P (p. 1022) omits घटत्वस्य च तदभाने०
R (2b10) omits च.
69. P (p. 1022), R (2b11): कश्चित्
70. R (2b11): लोहितो वह्नि०
71. P (p. 1022), R (2b11)add अपि after the word.
72. Q (18a1): घटत्वस्यावच्छेदकत्व०
73. P (p. 1022) adds अपि before the word.
74. Q (18a3): ०प्रतियोगिताकत्वसम्बन्धेनाभावे
75. P (p. 1023): ०पन्ने धूम
R (3a2): ०पन्नो धूम
76. R (3a2) omits the word.
77. Q (18a5): नीले घटे
78. P (p. 1024): पीतस्यान्योन्याभावस्य
R (3a3): पीतघटस्यान्योन्याभावस्य
79. P (p. 1024): ०भेदेनोदाहरणप्रदर्शनम्
80. Q (18a6) omits the word.
81. P (p. 1030): ०नान्वयबोध
82. P (p. 1030): इदमत्रावधेयम् for इदम् चात्र बोध्यम्
83. R (3a7): पीत
84. R (3a8): अभेदेन सम्बन्धेन for अभेदसम्बन्धेन
85. Q (18a7) omits तच्च.
86. P (p. 1032) adds च after the word.
87. R (3a10): तत्पदेनानवबोधनात्
88. P (p. 1032): पक्ष्यतीत्यादौ
89. P (p. 1033): तिङर्थस्य
90. P (p. 1033): तत्तत्पदो०
R (3b2): तत्तप०

91. P (p. 1033): ०नुयोग्यन्वयबोधे
R (3b2): ०नुयोगिन्यन्वयबोधे
92. R (3b3 omits अपि.
93. P (p. 1034): ०स्थापितस्येति
94. Q (18b6), R (3b6) omit भाव०
95. P (p. 1035): ०स्थाप्य
96. Q (18b7), R (3b8) omit भाव०
97. P (p. 1036) omits the word.
98. P (p. 1036): संग्रह:
99. P (p. 1036) omit अभावोपस्थिति:.
R (3b12) नञ्पदजन्ये प्रथमान्त० for नञ्पदजन्या ' ' ' प्रथमान्त०
100. P (p. 1036): एव बोधव्य: for बोध्य:
101. P (1036): ०म्बन्धेनान्वय:
102. P (p. 1036): षष्ठ्या अर्थ:
103. P (p. 1036), R (4a2): स्वत्वस्य षष्ठ्यर्थत्वे
104. P (p. 1036), R (4a2): सम्बन्धेन तत्रान्वय
105. R (4a4): प्रकृत्यर्थत्वेन
106. Q (19a4): वृत्तितानियामक
107. P (p. 1038): षष्ठ्यर्थत्वं
108. P (p. 1038): निरूपकत्वेन सम्बन्धेन
109. R (4a7): ०मेवेति कथमेवेति
110. R (4a9): ०वच्छेदकसम्बन्धत्वे
111. P (p. 1038): बाधकमित्यत
112. P (p. 1038), R (4a10) omit here the sentence: वृत्त्यनियामक . . . .भाव:० ।land C read the sentenceat different places. Vide note nos. 115and 119.
113. R(4a11): ०स्थितिजन्यो
114. Q (19b1): नञ्पदजन्ये घट०
115. R (4a11) adds the very sentence withafew variant readings mentionedat the note no. 112, before this word. The sentence read here runs thus: वृत्तितानियामकसम्बन्धपुरस्कारेणैव सर्वत्राभावप्रतीतिरस्ति एतद्धनस्वामित्वंमैत्रे नास्ति चैत्रस्वत्वमत्र नास्तीत्येवाभावप्रत्ययात्।। न तु निरूपकत्वादिसम्बन्ध प्रतियोगितावच्छेदकीकृत्य क्वचिदभावधीरस्तीति भाव:। तादृशशाब्दबोधे।
116. P (p. 1038), R (4b1) omit the portin: नामपदोत्तर . . . वा.
117. Q (19b3) omits न.
118. R (4b2): नञ्पदजन्यनञा ज्ञायते for नञ्पदे न जायते
119. P (p. 1038)adds the sentence mentionedat note no. 112 before the word. The sentence has some differences in reading here: वृत्तितानियामकसम्बन्धपुरस्कारेणैव सर्वत्राभावप्रतीतिरस्ति एतद्धनस्वामित्वं मैत्रे नास्ति चैत्रस्वत्वमत्र नास्तीत्येवाभावप्रत्ययात्।। न तु निरूपकेत्यादिसम्बन्ध प्रतियोगितावच्छेदकीकृत्य क्वचिद्भावधीरस्तीति भाव:।
120. R (4b3): नञ्पदजन्य
121. P (p. 1041) adds पद after सप्तमी०
R (4b4): ०नञ्पदजन्या संसर्गा०
122. P (p. 1041) omits तु.
123. P (p. 1041)adds कुतो before the word.
124. Q (19b5): कार्यजननीयेत्येषा
125. P (1041): सप्तम्यर्थस्याभावो
126. R (4b6): चाधारा०

127. P (p. 1041): ०मेवेत्यत for ०मेव तदा
R (4b6): ०मेवैतदत for ०मेव तदा
128. P (p. 1041) omits च०
129. P (p. 1042): ०नुसारे
130. P (p. 1012): मते आह
131. Q (20a1): केचिदिति
132. Q (20a2), R (4b10): नञ्समभिव्याहारे
133. Q (20a2) omits the word.
134. Q (20a3): नञ्बोध्य
135. P(p. 1043), R (4b14): अभावस्यैकत्वात्
136. Q (20a4): तद्द्वित्वबहुत्वयो:
137. P (p. 1043), R (5a1): स्फुटमेवेति
138. Q(20a5): Illegible from तच्च upto तच्चा.
139. Q (20a5): ०तार्थाश्रयत्वे
140. R (5a3): तच्च for स च
141. P (p. 1043): शाब्द for अन्वय
142. P (p. 1043): ०वच्छेदेनै
143. P (p. 1043), omits द्वित्व.
144. R (5a7): ०करण्यान्वयात्
145 P (p.1045) omits the word.
146. P (p.1045), R(5a10): सत्त्वाभावो
147. P (p.1045): ०बोधेन
148. P (p. 1045): ०समवेतत्वेति
149. P (p. 1045): सत्त्वासमवायपरं
150. P (p.1045): जात्यनुयोगित्वा.
R (5a12): ०भाववारणाय
151. Q (20b6): ०स्यैवमपि
152. P (p. 1045), R (5b1): ०पपन्नैवेत्याशय:
153. P (p. 1045): ०वच्छेदक
154. Q (21a2): द्विवत्वावच्छिन्न०
155. Q (21a3): क्रियापदस्य सम.
R (5b5): क्रियापदस्य सति सम.
156. Q (21a3): ०दिकस्तु
157. P (p. 1048): ०लाधेयत्वयो:
158. P (p. 1048) omits घट०
159. P (p. 1048), R (5b8) omit बोध०
160. P (p. 1048) omits न०
161. P (p. 1050): स्तोकभेदस्य
R (5b11): स्तोकस्याभेदस्य
162. R (5b11): ०त्वादाह
163. P (p. 1050): ०विभक्तिराहित्यं
164. Q (21b2): ०व्याहतेन नञ्पदत्वेन
165. R (6a3): ०समभिव्याहृत
166. R (6a3) omits धर्मिपराख्यात; reads पदान्तरे for पदोत्तर०
167. P (p. 1051): तन्त्रमतएवेत्यर्थ:
168. Q ((21b5): ययामह०

R (6a7): याजमह०
169. Q (21b5): जयामह for यजामह
170. P (p. 1051): उच्चारयेत्
171. P (p. 1051): एकवाक्यत्वेति
172. Q (21b6): अनुजायभिन्नेषु
173. Q (21b6): जयामह for यजामह
P (p. 1051): जयामहमन्त्रकरण०
174. Q (21b6): जयतिषु
175. P (p. 1051): विधौ
176. Q (21b6): जयामह०
177. Q (22a1): ०सन्धानस्याद्यवाक्यार्थ०
178. R (6a10) omits the entire sentence: ये यजामह · · · · भाव:०
179. P (p. 1051): संग्रह:
180. Vide समासवाद: in *Tattvacintāmaṇi* vol. IV, Part 2, p 788. The reading there is यजतिषु च ये यजामहे करोति नानुयाजेषु०
181. Q (22a1): इत्येव तु
R (6a11): इत्यत्र तु
182. R (6a11) omits the word.
183. P (p. 1051): ०मनिष्टसाधनमिति
184. P (p. 1051): ०रन्वयइत्यत
185. P (p. 1054) reaods fter this the following portion: ननु यत्र च विशेषणविशेष्ययोरभेदान्वयबोधो व्युत्पन्नस्तत्र भेदो नञा बोध्यते इति नियमात् कथं यजतिषु अनुयाजभेदान्वय: तत्र प्रकारीभूतविभक्त्यर्थोपस्थित्यभावेन विशेषणविशेष्याभेदान्वयासम्भवादित्यत आह–**नामार्थयोरि**ति। अव्ययनिपातातिरिक्तनामार्थयोरि इत्यर्थइत्यपरे। As it is notavailable in the two other manuscripts of नञ्वाद commentary of Bhavānanda, so the portion so has been left out of the text. Most probably the portion is from some other commentary.
186. P (p. 1055), R (6b1): एतत्त्वं
187. Vide आख्यातवादार्थविवेचन (alias आख्यातवादटिप्पनी, Edited by the present editor for the DRS, Sanskrit, RBU), parano. 2.
188. P (p. 1055) adds after the word.
189. Q (22a3): लाघवेति
190. P (p. 1056): ०स्थितिहेतुत्वं
191. R (6b3): गतिरित्यत
192. R (6b4) omits the portion: विना · · · नुसन्धानं०
193. P (p. 1056): ०समाससत्त्वेन
194. R (6b5) omits the word.
195. Q (22a6): तत्र तत्र
196. R (6b6) omits कल्प्यमि · · · नुसन्धान०
197. R (6b6): शाब्दबुद्धे:
198. P (p. 1056): विभक्त्यर्थाभेदाभावान्वयबोधने
R (6b7) adds नञा before this word.
199. R (6b9): ०दित्यनुषज्यते
200. P (p. 1056), R (6b9) omit the word.
201. Q (22b1): एकदा
202. P (p. 1058), R (6b10): ० न्वयायोगात्
203. P (p. 1058): नञो

204. P (p. 1058), R (6b11): भेदत्वेन प्रतीते.
205. P (p. 1058) omits शक्ति०
206. P (p. 1058): एकवक्यत्वानु०
R (6b12): ०रोधादित्युक्त०
207. R (6b13) omits विषयक०
208. P p. 1059): ०मुत्थापयति
209. Q (22b4): ०परतायां
210. Q (22b4): ०परतायां
R (6b14) omits the word.
211. R (6b14): चाक्षुषामत्वा०, शाब्द for शब्दे
212. Q (22b4): जयतिष्वि० · · · ० रनुजायभिन्न०
P (p. 1059): ०भिन्नयागपरत्वमित्येक.
213. Q (22b5) omits न०
214. R (7a3) omits the word.
215. P (p. 1059): समानवचनस्यापि
216. R (7a3) omits the word.
217. R (7a4)adds एवं after the word.
218. P (p. 1059): बोधनात् भेदा०
219. R (7a5) नियामकत्वोक्ते:
220. P (p. 1059) omits the word.
221. R (7a6) omits the word.
222. P (p. 1059), R (7a7): ०दिति भाव:
223. P (p. 1059): विभक्तर्थैकत्व ०· · · ०देर्विवक्षितत्वेन
R (7a7) विभक्त्यर्थे एकद्वित्वादेर्विवक्षितत्वेन
224. P (p. 1059): भूपा एकतृणतुल्या इति for एकतृणतुल्य० मप्यन्वयबोधो
R (7a7): ०तुल्यत्वबुद्ध्यु०, ०मप्यभेदबोधो
225. R (7a8) omits इत्यादौ०
226. P (p. 1059), R (7a8): विभक्त्यर्थैक० · · · ०त्वाविवक्षायां
227. R (7a8): तथात्वमिति सम्भव:
228. P (p. 1058) omits the word.
229. P (p. 1059) सामान्यंतदितरपरम्
2230. P (p. 1066), R (7a13): ०धायकंवाक्यं
231. R (7a13): विकल्पापत्तेरिति
232. R (7b1): रात्रिभिन्नपरत्वमपि न
233. Q (23a6): ०विषयतया
234. Q (23a6), R (7b2) omit इति०
235. P (p. 1067): ०शाब्दबोध
236. P (p. 1067), R (7b3) omit अत्र०
237. P (p. 1067), R (7b4): आहार्यारोपरूपा
238. Q (23b1): सम्भवेपि
R (7b4): सम्भवत्यपि
239. P (p. 1069): तादृश०
240. P (p. 1069) adds शङ्कते before वैयर्थ्यमिति०
241. R (7b5): तन्निषेधनप्रतिपादनं
242. P (p. 1069), R (7b6): निष्प्रयोजनमिति
243. Q (23b3) notes इष्टसाधनत्वाभावस्येत्यर्थ:०

244. R (7b7): विरोधे
245. R (7b8): निषेधविधेरर्थ:
246. R (7b9): विधेरर्थ:
247. R (7b10) omits the word.
248. P (p. 1072): तद्बोधनाय
249. P (p. 1072) omits the word.
250. R (7b12): विधानं
251. P (p. 1072) : निषिध्यते
252. R (7b13): ०तात्पर्यानवबोधने
253. Q (23b5): श्राद्धं
254. R (7b13): प्रसज्यते
255. R (8a1) adds प्रसक्ते before निषिद्धे०
256. R (8a2): एतस्य
257. P (p. 1073): सार्थक्यमिति
258. Q (23b6) omits the word.
259. Q (23b6): विशिष्टार्थ०
260. R (8a4) omits दध्ना जुहोति०
261. R (8a6): बोधितेन
262. P (p. 1073): ०मित्येवंरूपविशिष्टै०
263. R (8a9): ०साधनत्वमित्यर्थ०
264. R (8a9) omits the word.
265. Q (24a4): निषेधत्वं
266. P (p. 1073), R (8a10): तदारभ्याधीनत्वेन
267. P (p. 1073), R (8a10) omit महिम्ना०
268. P (p. 1073): रात्रिभेदपरत्वविधित्वे
R (8a10): रात्रिभेदरूपरद्विधित्वे
269. P (p. 1073): निष्ठित्वे
270. P (p. 1073), R (8a10) omit सम्भवार्थ०
271. P (p. 1073), R (8a11): नेक्षेतोद्यन्त०
Q (24a5): नेक्षितोऽत्यन्त०
272. P (p. 1073): ०विरोधिसङ्कोचं
273. Q (24a5): इत्यादावपि
274. R (8a13): तदर्थकत्वात्
275. P (p. 1073), R (8a13): ०प्रयोजनकत्वात्
276. P (p. 1073), R (8a13): दुर्मिलमित्यत
Q (24a6)at first noted दुर्मिलमत, then मिल was scratched outand changed to र्लभ० Perhaps for simplification.
277. P (p. 1073): एकविषयकतयेति
278. Q (24a6), R (8b1): अनन्यगतिकतयेति० Neither of the two manuscripts of नञ्वाद records this reading. So the text has nnot been changed according to the commentary. Still it maybe the reading in some manuscripts of नञ्वाद०
279. Q (24a6): अत्र
280. Q (24a6): ० भावात्
281. P (p. 1073): आदिभ्या for नेष्टसाधनमित्यादिकमित्यादिना
Q (24b2): नेष्टसाधनमित्यादिकमित्यादिना
R (8b3): ०नेष्टसाधनमित्यादिनान

282. Q (24b2): ०नुबन्धित्वकृतिसाध्यत्व
R (8b4): ०नुबन्धिकृतिसाध्यमित्यस्य
283. R (8b4): संग्रह:
284. P (p. 1073) omits the whole sentence. "A" text collects the meaning of two आदिs by आदिभ्यां mentioned in note no 281.
285. P (p. 1073) reads the word before
286. P (p. 1073): ०नान्वयात्
287. P (p. 1073) omits च०
288. P (p. 1073): विभक्त्यर्थस्यान्वये
Q (24b3) omits रन्वये०
R (8b6): विभक्त्यर्थस्यान्वसाधनत्वादेरन्वये च
289. P (p. 1073) omits अभावे०
290. Q (24b5): ०नान्वय:
291. R (8b11): मृत for मूढ
292. R (8b12): मृत for मूढ
293. Q (24b6), R (8b12): (?)सृत्य for मृद्य
294. Q (24b6) , R (8b12) omit भावा०
295. R (8b12): ०द्विभक्तर्थे प्रति०
296. R (8b13): धात्वर्थेर्थान्वितत्वे
297. Q (25 a1): विभक्त्यर्थस्यान्वये
298. P (p. 1075): नियमतस्त्विति
299. Q (25a1): षोडशी for षोडशि
300. R (9a1): ०फलवत्त्वात्
301. R (9a1): ०साधनबोधने
302. R (9a2) omits फलम०
303. P (p. 1075), R (9a2): ०लक्षणे चाफलत्वं
304. R (9a2) omits the word.
305. R (9a3): ०भावेनेष्टसिद्धौ
306. P (p. 1076): कष्टसाध्य
307. P (p. 1076) omits न०
308. Q (25a4), R (9a5): स्वत:
309. P (p. 1076): विधावननु.
310. Q (25a4): मुख्य
311. P (p. 1076): अभावाधिकरणाधिकरणयोराधाराधेयभाव:
312. P (p. 1076) reads न before प्रकारतया०
313. R (9a7) omits न०
314. Q (25a5): ०त्वात्इत्यत
315. P (p. 1081): ०पातजन्यतदन्वय०
Q (25a5): ०पाताज्जन्यतदन्वय०
316. P (p. 1081): न कल्प्यमिति
317. P (p. 1081): एतच्च
R (9a9) एतत्तत्वम्
318. Q (25a6): शब्दालोकसारमञ्जर्यां
319. P (p. 1081): अभिहितम् for प्रपञ्चितम्
320. P (p. 1081) omits च०
321. Q (25a7): वा (?) एवतुचादि

R (9a11) omits एववातु०
322. R (9b1): इत्यादौ
323. Q (25b2): ०करण्यान्वयानु०
324. P (p. 1082), R (9b1) omits the word.
325. P (p 1082): मण्किारोक्तं. Vide *Tattvacintāmaṇi*, vol. VI, Part 2, p. 787: अघट: पट इत्यादौ च प्रसज्यप्रतिषेधार्थे नञि सामानाधिकरण्याद् अभाववल्लक्षणा · · ·।
326. R (9b1): नञ्तत्पुरुष०
327. R (9b2): तेन च
328. P (p. 1082): संसर्गाभावरूपवत्त्वं
R (9b2): संसर्गाभाववापवत्त्वं
329. P (p. 1082): बहुव्रीहिं for बहुव्रीहिसमासं
330. P (p. 1082): संसर्गाभावबोधनात् for संसर्गाभावस्य बोधसम्भवात्
331. P (p. 1082): चित्रगुरित्यादौ उत्तरपद
332. P (p. 1082): प्रकृते च घट०
333. Q (25b4): चित्रगवाभेदा०
R (9b5) omits बोध०
334. Q (25b4) R (9b5): गोशब्दार्थस्य
335. Q (25b4): भाषत
336. P (p. 1082): साक्षात् सम्बन्ध
337. P (p. 1082): तु
R (9b6) omits the word.
338. Q (25b5) omits the word.
R (9b7): न नञि
339. R (9b8): नञ्नत्पुरुष०
340. P (p. 1082): पश्यति for पदंपश्येति
341. P (p. 1082): प्रथमान्तश्चेत् for प्रथमान्तत्वे तु
342. P (p. 1082): नञ् for नञि
343. R (9b10): ०साधुत्वाच्च
344. Q (25b7): ०विभक्तोपस्थि०
345. P (p. 1082): निपातातिरिक्तत्व
346. P (p. 1083), R (9b12): षष्ठ्याद्यर्थो.
347. Q (25b7): निरूपितत्वेन चाभावस्यानधिकरणत्वेनान्वय:
348. P (p. 1083) adds तथा सति after the word.
349. R (9b13): ०नाघटा
350. P (p. 1083) omits तथा सति०
351. P (p. 1083), R (9b13): घटीयाभावेऽपि
352. P (p. 1083), R (9b14): ०त्वादे: सम्बन्धस्य
353. P (p. 1083), R (9b14) omit च०
Q (26a1): ०प्रतियोगित्वाभावात्
R (9b14): ०प्रतियोगित्वावच्छेदकभावाभावात्
354. P (p. 1083): प्रकृत्यर्थान्वयो०
355. P (p. 1083): घटानुयोगिकत्वाभाव:
356. P (p. 1083): प्रथमार्थत्वे
357. Q (26a3): नञर्थानुपपत्तिश्च
358. Q (26a3): अनुयोगित्वइवेति for अनुयागित्वे वेति
R (10a3): अनुयोगिके चेति

359. P (p. 1083): बोध्य
360. P (p. 1084) omits the word.
361. P (p. 1084): षष्ठ्याद्यर्थस्यानुयोगित्वस्य
362. R (10a4) omits the entire sentence: पटाभावो न घट · · · नान्वये.
363. R (10a4): ०विभक्तिकत्वं
364. P (p. 1084): षष्ठीविनिमयविभक्ति०
365. P (p. 1084), R (10a5) omit अनुयोगित्वस्य०
366. P (p. 1084), R (10a5) omit the word.
367. P (p. 1084): घटाभावस्यानुयोगिकत्ववान्
368. Q (26a5): नञन्तरस्य
369. Q)26 5), R (10a6): सुपोऽनुसन्धान
370. Q (26a5): लक्षणा च
371. Q (26a6): ०नञो चाभाव०
R (10a6): ०नञो वाभाव०
372. Q (26a6): नञा
373. P (p. 1085): यत्तु विशेषणविशिष्टपदयो.
374. P (p. 1084), R (10a6): ०बोधे
375. Q (26a6): ०मकत्वमुक्तम्
376. R (10a8) omits the word.
377. P (p. 1085): अव्यय for व्यत्यय
378. P (p. 1085): कर्मत्वाद्य० · · · · ०र्थस्य
R (10a8): ०र्थस्य
379. P (p. 1085), R (10a9): ०न्तार्थेन
380. P (p. 1085): नञो for नञा
381. P (p. 1085) reads here along sentence which is read a little later in "Q" manuscript: यथा ब्राह्मणस्य धनम् न मूर्खस्यइत्यादौ नञर्थे भेदे मूर्खानुयोगित्वस्य बोधे नञर्थस्याधिकरणत्वेनान्वये मूर्खभिन्नस्य ब्राह्मणस्येत्यर्थो लभ्यते तथा
382. R (10a10): for
383. Q (26a7) reads the sentence which is read in "P"alittle former. Vide note no. 381. Emendedaccording to "P" text. The reading in "Q" runs thus: यथा ब्राह्मणस्य धनंमूर्खस्येत्यादौ नञर्थमूर्खानुयोगित्वस्य बोधे नञर्थस्याधिकरणत्वेनान्वये मूर्खभिन्नस्य ब्राह्मणस्येत्यर्थो लभ्यतइति। R (10a10) omits the sentence herebut reads italongafter. See note no. 398.
384. Q (26b1) omits विरुद्धार्थकत्वमेव०
385. Q (26b1): ०षष्ठ्यर्थस्य
P (p. 1085): ०षष्ठ्याद्यर्थ
R (10a11): तिङापि
386. R (10a11): ०भावेन
387. P (p. 1086) : साक्षादन्वयेन
R (10a11) : साक्षादन्वये
388. P (p. 1086): कृतिसम्बन्धयोर्भेदबोधापत्तिः for पाकानुकूल · · · बोधापत्तिः
Q (26b2): बाधापत्तिः for बोधापत्तिः
R (10b11): पाकानुकूलभेदस्य राजसम्बन्धस्य च बोधापत्तिः for पाकानुकूल बोधापत्ति
389. R (10a12): एवंच
390. Q (26b2): नञर्थ
391. P (p. 1086): अधिकरणत्वेन for अधिकरणत्वे
392. R (10a13): संसर्गा for प्रसङ्गा

393. P (p. 1086), R (10a13): अभेदान्वये
394. P (p. 1086), R (10a13) omit च०
395. P (p. 1086): अप्रयोजकत्वंइति व्याख्यान्तरअत्यन्तसमीचीन। The printed text of the commentarybreaks here.
396. Q (26b4) omits च०
397. Q (26b4):
398. R (10b2) reads a long sentence here which isalready read in "Q" and "R" at different places. Vide note nos. 381and 383. The text reading here is as follows: यथा ब्राह्मणस्य धनंन मूर्खस्येत्यादौ नजर्थे मूर्खानुयोगित्वस्य बोधेन नञर्थस्याधिकरणत्वेनान्वये मूर्खभिन्नस्य ब्राह्मणस्येत्यर्थो लभ्यतेइति०
399. R (10b4) omits संसर्गाभाव · · · योग्युपस्थिति:०
400. Q (26b5) omits च०
401. R (10b4): न पचतीत्यादौ
402. Q (26b6) omits the word.
403. R (10b5): च
404. Q (26b6) omits न च०
405. Q (26b6): सप्तम्यनु०
     R (10b6): ०योगिपद
406. R (10b7): ०प्रसङ्गे
407. R (10b7): ०बोधकरणाय
408. R (10b7): ०सरणमिति वाच्यं
409. R (10b7): तावतापि
410. Q (26b7) omits न०
411. R (10b8): घटप्रतियोगिक: संसर्गाभावइति बोधस्य
412. Q (26b7): राजत्वस्य
413. Q (26b7) नञ्वादटिप्पनी समाप्ता for the verse.

List of authorities and quotations in the Text and Commentary

Authorities mentioned in the *Nañvāda*

	Page Nos.
कश्चित्	1
केचित्	1, 3
प्राभाकराः	2

Quotations in the *Nañvāda*

अमावास्यायां पितृभ्यो	2
न कलञ्जं	2
यजतिषु ये यजामहं	1
रात्रौ श्राद्धं न	2

Authorities and texts mentioned in the *Nañvādaṭippanī*

अन्ये	9
अस्माभिः (भवानन्द)	17
आख्यातवादार्थविवेचन	13
एवकारार्थसारमञ्जरी	17
कश्चित्	12, 19
केचित्	8, 11, 17
नञ्वादार्थप्रदीप	19
नवीनाः	7
नव्याः	9
प्राचां मते	14

Page Nos.

प्राचीनाः 7
प्राभाकराः 16
भवता 19
भवानन्दसिद्धान्तवागीश 19
मणिकार 13, 17
मीमांसक 15
वैदिकसम्मतः पाठः 13
वैयाकरण 10
स्मार्त 14

Quotations in the *Nañvādaṭippanī*

अग्निहोत्रं जुहोति (तैत्तिरीयसंहिता 1-5-9-1) 15
दध्ना जुहोति (मैत्रायणीसंहिता 4-7-7) 15
दीक्षितो न ददाति 15
न कलञ्जं 16
नानुपमृद्य प्रादुर्भावात् (न्यायसूत्रम् 4-1-14) 16
नानुयाजेषु करोति 13
नामूढस्येतरोत्पत्तेः (न्यायसूत्रम् 4-1-6) 16
परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः (पा.सू. 2-4-26) 17
रात्रौ श्राद्धं न 14
स्वर्गकामो यजेत (ताण्ड्यमहाब्राह्मण 16-15-5) 16

Bibliography

Bhāratīya Darśan Kośa (Prācīna-Nyāya, Navya-Nyāya and Vaiśeṣika-Darśana). Vol I. Compiled by Srimohan Bhattacharya and Dinesh Chandra Bhattacharya. Sanskrit College, Kolkata, 1978.

Encyclopedia of Indian Philosophies, vol I. Ed. Karl H. Potter. MLBD, Delhi, reprint, 1974.

Encyclopedia of Indian Philosophies, vol VI. (Indian Philosophical analysis Nyāya-Vaiśeṣika from Gaṅgeśa to Raghunātha Śiromaṇi). Ed. Karl H. Potter and Sibajiban Bhattacharya. MLBD, Delhi, 1993. The volume contains a summary of *Nañvāda* of Raghunātha. The note given there is the following: This summary was initially prepared by Janakivallabha Bhattacharya, with revisions by Potter. The work is edited and translated by Bimal Krishna Matilal in his (RB 5341): *The Navya Nyaya Doctrine of Negation.*

Gautamīya Nyāyadarśana. With the *Bhāṣya* of Vātsyāyana. Ed. Pt. Anantalal Thakur. Indian Council for Philosophical Research, New Delhi, 1997.

Negative Words: Their ways in language. Dr. Pradip Kumar Mazumdar. Sanskrit Pustak Bhandar, Kolkata, 1994.

Nyāyamañjarī (Fifth Āhika), Jayanta Bhaṭṭa. Ed. Prabal Kumar Sen. With Bengali translation and notes. Sanskrit Book Depot, Kolkata, 2008.

Nyāyasiddhāntāmuktāvalī, Viśvanātha Bhaṭṭācārya. With *Bhāṣāpariccheda.* Along with *Vilāsinī* Sanskrit and Hindi commentaries by Jwala Prasad Gaud. Ed Pt. Dhundhiraj Shastry. Chaukhamba Sanskrit Pratisthan, Delhi, 1991.

Nyāyasūtra, Gautama. Vide *Gautamīya Nyāyadarśana.*

Tarkasaṃgraha, Annambhaṭṭa Ed. Gopinath Bhattacharya. Progressive Publishers, Calcutta, 1994

Tattvacintāmaṇi, Gaṅgeśa. Vol. IV, Part 2. Ed. MM Kamakhyanatha Tarkavagisa. Reprint. Oriental Book Centre, Delhi, 1990.

NMM

NMM